
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

अथविद्यावानितिनेमस्सगुणं वकुं पद्यमवतारयति। यमिति। यंरामं शैवाः शिवभक्ताः शिवइति नाम्नासमुपासते।
महारुद्रः सूक्ष्मरूतिरतः सूचनतोहमितिनतो विश्वमितिश्रुतेः। वेदांतिनो ब्रह्मेति। एकमेवाद्वितीयं ब्रह्मनेहनाना
नास्तिकिंचनेतिश्रुतेः। बौद्धाबुद्धइति। प्राणप्रालंभनं संस्रतिनं दयतिदयये तिमामितिश्रुतेः। प्रत्यक्षानुमानोप
मानशब्दाः। प्रमाणानीति प्रमाणे ष्ठेव निपुणा नैयायकाः कर्तेतिसनातनाः पशवः प्रविशंतियंप्रमेयानु

यंशैवाः समुपासते शिवइति ब्रह्मेतिवेदांतिनो बौद्धाबुद्धइतिप्र
माणपटवः कर्तेति नैयायकाः॥ अर्हन्नित्यथजैनशासनरताः क
र्मेतिमीमांसकाः सोयंवो विदधातु वांछितफलं त्रैलोक्यनाथो हरिः

मूतेः कर्तैवततुइतिश्रुतेः। जैनाज्ञाभिरताः अर्हन्नितिस्वभावएवेश्वरो नान्योस्तिकर्दाप्यस्यानीदृशत्वाप
त्तेरितिश्रुतेः। मीमांसकाः कर्मेति। कर्मणाजायते नश्यति भयाभयसुखानीतिश्रुतेः॥ एतेतुपदिशाते
रेवमार्गैर्यमुपासते सीयरामो वांछितफलं पूरयतु। एतेन विद्यावत्त्वमुक्तं हरिरितिश्रवनेन दुःखहारित्वात्प
रमेमागुणो दर्शितः। त्रैलोक्यवासिजन्यैस्तत्तद्देवताभजने नतत्तत्फलं प्रतिनाप्यतेयाच्यतइति एतेनदातृत्वमु

Accession No. ~~384~~ M-1804 Date - ?
Title - हनुमन्नाटक. Subject - नाटक.
Author - हनुमान. folio - 27 avalible. (1, 17, 24-29) missing)
Xerox - 56

इदानीं कथायोजनाय व्याख्यकृतात्मनः श्लोकमवतारयति। आसीदिति। सपंक्तिरथो भूपो दशरथो राजा आसीत्। सकयस्य भूरिश्रवाः नारायणस्त्वमात्मानमेव राम भरत लक्ष्मण शत्रुघ्नरूपेण चतुर्धा विधाय पुत्रतां आर प्राप। किमर्थं उर्व्यां ये वर्वरा राक्षसास्तेषां यो भूरिभारस्तन्नाशाय। वर्वरा राक्षसाधमा विति धरणिः॥ किंभूतः महिरामतः पुत्रार्थं इष्टः अन्यत्स्पष्टमेव॥४॥ तेषां चतुर्णां पुत्राणां मध्ये जनुषा जन्मना ईश्वर प्रतिपादक गुणैश्च रामः ज्यायान् अतिशयेन ज्येष्ठो भूदिति योज्यं। अन्यत्सुगमं॥५॥ सुंदरस्त्रीसुंदरनाम्नो रक्षसः स्त्री

असीदुर्वरभूपतिप्रतिभटप्रोन्माथि विक्रांतको भूयः पंक्तिरथो विभावसुकुलप्रख्यातकेतुर्वली॥ उर्वीवर्वरभूरिभारहतये भूरिश्रवाः पुंस्तां यस्यात्स्वमथो विधाय महितः पूर्णश्चतुर्धा विभुः॥४॥ तेषामीश्वरतागुणैश्च जनुषा ज्यायानभूद्राघवो रामः सोप्यथ कौशिकेन मुनिना रक्षोभयाद्याचितः॥ राजानं सम्प्रशोधनोन रपतिः प्रादात्स तं दुःखितस्तस्मै सोपितमन्वगाद्नुगतः सौमित्रिणा स्वेमुदा॥५॥ सुंदरस्त्रीहृदमनप्रमोदमुदिता दास्थाय विघ्नोदयं समः सत्यवतीसुतादथ गतस्तस्याश्रमं लीलया॥ उसे कौशिकनंदनेन च मखे तत्रागतान् राक्षसान् हत्वामूमुचदाशुभाविविदसौ मारीचिमुद्राकृतिं॥६॥ पूर्णे यज्ञविधौ जितासुरभवद्रामेण सार्द्धं मुनिः सीतासंवरणागतात्खिलनृपव्याभुग्नवीर्यश्रियं॥ श्रुत्वा तद्धनुरुत्सवं च मिथिलामास्थायते नाधिकं सत्कारै रुपलंभितः पुनरगाच्चापाश्रितं मंडलं॥७॥ रामरामरामरामराम

ताटकासत्यवतीसुताद्विश्वामित्रात् भाविवित्। निमित्तभूतमानेन मृगरूपेण रावणः सीतां हरिष्यतीति भाविवित्॥६॥ शेषं सुगमं॥७॥ रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामजी

2

असौरघुनंदनोरामः मधुरमूर्तिः
तत्ररामंदृष्ट्वासीताविचिकित्सति। कमटेति। इदंधनुः कमटपृष्ठवत्कठोरं असौरघुनंदनोरामः मधुरमूर्तिः
सुकुमाराङ्गः अहहेतिखेदे। अनेनरामेणइदंधनुरधिज्यं अधिकृत्यगुणंकथंविधीयतां। अतस्तातस्यपितुः
पणः यः कोपिधनुरधिज्यंकरिष्यतितस्मैसीतांदास्यसीत्येवंरूपाप्रतिज्ञा॥ स्कत्वेदारुणोयोग्योयद्वादिप
र्गपाठेहेतातत वपणोदारुणः इतिमानसोक्तिः। तानपणश्चेन्माभविष्यत्तर्हिरामम भजिष्यामीति
भावः। स्त्तवस्तात्रमिति॥ ८॥ अथरामः सीतांसंशयमवधार्यात्मशक्तिं ज्ञापयितुं लक्ष्मणमनुवदति। रामः ज
नकपुरोहितोसतानंद आहेतिकेचित्। भोलक्ष्मण अमीन्नपतयः आद्वीपात्समभ्यागताः। द्विर्गताआपो

कमठपृष्ठकठोरमिदंधनुर्मधुरमूर्तिरसौरघुनंदनः॥ कथमधीज्यमनेनविधीयतामहहतातप
णस्तवदारुणः॥ ८॥ आद्वीपात्परतोप्यमीन्नपतयः सर्वेसमभ्यागताः कन्यायाः कलिधौतकोम
लरुचः कीर्तिश्चलाभः परः॥ नाकृष्टंनचटंकितंननमितंनोत्थापितंस्थानतः केनापीदमहोम
हद्धनुरिदंनिर्वीरमुर्वीतलं॥ ७॥

पराणाम् द्वीपजंबुद्वीपस्तमभिव्याप्यपरतोद्वी
स्मिन्नितिद्वीपंसागरांतर्वर्तिदेशस्तमभिव्याप्यपरतः लंकादेरपि। यद्वाद्वीपोजंबुद्वीपस्तमभिव्याप्यपरतोद्वी
पांतरादपितत्रापिसर्वेनतुकेचन। तेषांमध्येनकेनापीदंमहद्धनुः यद्वामहच्चतद्धिदंधनुश्चमनाकृष्टंनन्वाक
र्षणंतिष्ठतु। नटंकृतंटंकारवन्नकृतंएतदपितिष्ठतु। नमितमपिनन्नमनमपिनज्ञातंस्थानतोपिनोत्थापितं
अहोमहदाश्चर्यंइदमुर्वीतलंनिर्वीरमेवात्रनकोपिनास्तीति। नन्वेतदाकर्षणादेकोलाभइतिचेत्तत्राह। क
लधौतस्यदाहोत्तीर्णहेम्नइवरुचिर्यस्याएवंभूतायाः कन्यायाः लाभः अपरः कीर्तिश्चलाभः। कलधौत
तप्तहेम्निइतिधरणिः। केन्येयंकलधौतरुचिः कीर्तिश्चलाभोपरइतिपाठेप्ययमेवार्थः। इयंकन्यासीतात
ल्लाभस्तस्मात्परःकीर्तिश्चलाभइति। अत्रसीतायाः पित्राद्यधीनतयाकव्यात्वं॥ ७॥

लक्ष्मणः रामहृदयानंदकंदांकुरो ऽवाप निज प्रचंडयोर्महतीं प्रौढीं नारयति। पूर्वार्द्धः स्पष्ट एवातत्तस्मात्कारणान्मा
मादिशाज्ञापय भृत्यस्य मम यत्कौतुकं आश्चर्यकर्तृबलं तत्पश्यपश्येत्यादरे वीप्सा॥ किं बलमिति चेत्तदा शहाए तद्धनुः प्रोद्धर्तुं
भूम्ना प्रतिनामितुं नम्रीकर्तुं प्रचलितुं कोणगुणाल्लोकनाय चपलयितुं नेतुं एतदाशापगं तुं निहंतुं भग्नीकर्तुं समर्थोस्मि किंपुन
राकर्षणमात्रमिति भावः। पिनाको जगवं धनुरित्यमरः। ममैवात्रेदृशी शक्तिर्भवं तस्य ब्रह्मांडसहा इति घोतितं॥१०॥ तयोरेवं
वदतोरेतदंतरमासाद्य रावणपुरोहितो जनकमनुवदति दातव्येति। रावणपुरोहितः॥ भोजनकदेयसर्वोत्तमा दुहिता वत्त्रयमेव
भवता कस्मैचिद्दयाचते पि वरायदातव्यैव असौ प्रसिद्ध कुलाद्याचारः। एतेन कौलीन्यमुक्तं। लंकापतिरनेनैश्वर्यमुक्तं। दोः क्री

देवश्रीरघुनाथ किं बहुतया दासोस्मिते लक्ष्मणो मेर्वादीन पिभूधरान्नगणये जीर्णः पिनाकः कियान्नू तन्मा
मादिशापश्य पश्य च बलं भृत्यस्य यत्कौतुकं प्रोद्धर्तुं प्रतिनामितुं प्रचलितुं नेतुं निहंतुं क्षमः॥१०॥ दातव्येयम
स्मत्त्रयमेव दुहिता कस्मैचिदेनामसौ दोः क्रीडामशकीकृतत्रिभुवनो लंकापतिर्याचते॥ नत्किंमूढवदीक्षसे न
नु कथागोष्ठीषु तस्यासति तद्वृत्तानि परोरजांसि मुनयः प्राच्यामरीच्यामरीच्यादयः॥११॥ रामरामराम

डामशकीकृतत्रिभुवन एतेनातिकल्यत्वमुक्तं॥ भुजक्रीडानिर्जितत्रिभुवनः। यद्वा भुजक्रीडया निर्जितं कृतं त्रिभुवनं येन ादंभा
चेतनयोर्मशाइति विश्वः। मशाएव मशकः एवंभूतो रावणः एनां स्वयमेव याचते। तस्मान्मूढवदज्ञातार्थवत्किमीक्षसे। किं विचारयसि।
ननु वितर्के प्राग्भवाः प्राच्या मरीच्यादयो मुनयस्तद्वृत्तानि रावणचरितानि कथागोष्ठीषु सतीषु नोस्मान्शासति कथयंति। किं
भूतानि। परोरजांसि शुद्धानि यद्वा रजेभ्यो भूरेणुभ्योपि पराण्यधिकानि परःशब्दं निपातमन्यते भोजराजः। इत्यादि विशिष्टगु
णोयं याचते तस्मादस्मै दातव्येति भावः। ननु कथागोष्ठीषु तस्यासतीति पाठे नु इति वितर्के गोष्ठीषु पुरा रत्नवर्णयेषु याच
न रूपासु तस्य रावणस्य कथाई दृगियमिति कृपाया का चिंता भ्रमति मिथ्या न किं तु सत्यैवेत्यर्थः॥११॥ रामरामराम॥

धनुराकर्षणे रावणशक्तिं द्योतयति काकूक्त्या ॥ दशकंधरः माहेश्वरं धनुः कष्टुं आकष्टुं अर्हति योग्यो स्ति किं ॥ किंभू
तः शंभोः आवासवासस्थानं अचलं उत्क्षेप्तुं उद्धर्तुं भुजकौतुकी ॥ भुजे कौतुकं यस्यास्तीति ॥ गुरोर्गृहमेवोद्धर्तुं किंपु
नस्तद्धनुरिति भावः ॥१२॥ हेतुर्मदहर्दुर्वारायद्धनुर्विदशकंधरस्यदोः परीक्षा भुजबलज्ञानरूपा कान्तकापीति तत् चइयं धनु
रधिज्यकरणरूपा परीक्षा कान्तकापीत्यर्थः ॥ किंविशिष्टस्य कैलासं गिरिमुद्धृतवतः ॥ अन्यत्सुगमं ॥ यद्वा किंविशिष्टस्य
तेहरेण नैपुण्येन सार्द्धं कैलासं नेत्रगुणं उद्धृतवतः उग्रैः रद्दैः धारयतः ईदृग्नेतानेदगिति ज्ञानवतः ॥ हरो नैपुण्यरूपद्रयो

जनकः ॥ माहेश्वरं धनुः कुर्याद्दधिज्यं चेद्दशास्यमितं ॥ पुरोहितः ॥ गुरोः शंभोर्धनुर्नेर्चेद्वूर्णतां नयति क्षणा
त् ॥१२॥ जनको विहस्य ॥ शंभोरावासमचलमुत्क्षेप्तुं भुजकौतुकी ॥ माहेश्वरं धनुः कष्टुमर्हति दशकंधरः
१३॥ पुरोहितः सक्रोधं ॥ सार्द्धं हरेण हरवल्लभया च दृव्याहरं वृषणमुखवृषप्रमथावकीर्णं ॥ कैलासमु
द्धृतवतो दशकंधरस्य केयं चते धनुषि दुर्मदहदोः परीक्षा ॥१४॥

रितिचरकः ॥ गुरोर्नेत्रगुणे भावे कैलाशस्त्रीहरेपि चे पिशाश्वतः ॥ च पुनः लभयाहृव्यासार्द्धं द्वेवीद्योतमानाल
भा कार्याकार्यपरीक्षा तया सहेत्यर्थः ॥ कार्याकार्यविचारेक्षाल भालभ्यानपश्वनिरितिविग्रहः ॥ किंविशिष्टं नेत्रगु
णं हेरंबषरामुखवृषाणामिवयाः प्रथमा विद्यास्ताभिराकीर्णं युक्तं ॥ हेरंबो गणेशस्तस्येवाग्रपूज्य विद्याषण्मुख
स्येव शत्रुसंहरणविद्या वृषो धर्मस्तस्येव लोकपालनविद्या एताभिर्युक्तं ॥ एतद्विशेषणत्वतिकल्यत्वरजितले
कत्वगुणा दर्शितो ॥ हरेगा लभया चेति पदद्वयेन विद्यावत्वमुक्तं ॥ किंवत् ॥ हरो रुद्रस्तद्वत् ॥ यथा रुद्रः सर्वज्ञा
नाति तथाखिलनेत्रगुणान् जानतः ॥ तवधनुरुद्धरणमात्रेका परीक्षेति भावः ॥१४॥ ॥ ॥ ॥ ॥

जनकोपिपुरोहितमाशिष्यस्त्वप्रतिज्ञातंराज्ञः श्रावयति॥ जन एवजनकः जनानांसमहोजानकंज्ञानकमस्यास्तीति
जानकीजनसमृद्धिमान्जानकीजनकः॥ अन्यथासीतावचनवर्णनेन वैरसत्वमायाति॥ अतोजानकीपरेनजनक
[illegible]
पव्याजतातेषुजनकेः पुमानितिधरणिः॥ मुल्कमितिपाठे॥ जनकस्य ममशुल्कंपणंशृणुत॥ नमाह्वायत्र धनुषिदश
वदन भुजानांशक्तिः कुंठिताजातातदेशंधनुर्यः कोपिनमयतिनद्दारोपणेनेव मैथिलीतस्यतद्दारोपणकर्तुः दाराः
स्यात्हारशब्दोभूम्न्येव किंविशिष्टात्रिभुवनजयलक्ष्मीः॥ यत्रासौत्रिभुवनेजितंभवतीतिभावः॥ धनुरारोपणेनत
द्वासिजनावमानात्॥ इत्युक्तेरामः सर्वैतोवलोक्यानदुत्थापनंनाटयति॥ १५॥ अत्ररामेचित्ररसः प्रतिपाद्यते॥ धनुः

जानकी॥ श्रणुत जनककल्याः क्षत्रियाः सर्वएते दशवदनभुजानांकुंठितायत्रशक्तिः॥ नमयतिधनुरैशं
यस्तदारोपणेन त्रिभुवनजयलक्ष्मीमैथिलीतस्यदाराः॥ १५॥ रामः॥ कपोलेजानक्याः करिकलभदंत
द्युतिमुषिस्मरस्मेरंगंडेडुमरपुलकंवक्त्रकमलं। मुहुः पश्यन्श्रृण्वन्रजनिचरसेनाकलकलंजराजूटग्रं
थिंरचयतिरघूणांपरिवृढः॥ १६॥

स्थानेतिर्यङ्मुखमुपविष्टायाः स्थितायाः जानक्याः कपोलेस्मरस्मेरंसकामस्मितं यथास्यात्तथावक्त्रकमलंनिज
मुखारविंदप्रतिबिंबंपश्यन्सन् एतेनमधुररसोदर्शितः॥ किंविशिष्टेकपोले। करिकलभोहस्तिशावकस्तस्यदंतयो
र्द्युतिः किंचित्पीतोज्वलांतांमुष्णातीति एतेनसीताथाः अपिचरमकैशोरत्वमुक्तं॥ स्वयंवरागतरक्षः सेनाकोलाह
लंचश्रएवन्वयलाद्धरिष्यामइत्येवंरूपं एतेनभयानकोदर्शितः॥ जरासमूहयग्रंथिरचयतिएतेनवीररसोदर्शितः
व्रतिनस्तुजटासटेत्यमरः॥ गंडोडुमरपुलकं॥ एतेनोद्भास्वरः स्निग्धसात्विकोदर्शितः॥ रसत्रयेपिडमरः प्रचं
डः परिवृढोधिपः॥ उक्तंचमहीयरसोदधौ॥ शावलत्वंहिरसानांसर्वेषामेवजायतेयत्र॥ दशमः सोत्रनिकूले चित्ररसः
सर्वरससारः॥ १६॥

6

धनुरुद्धरणाडंबरे सीताजामदग्न्ययोः शुभाशुभे द्योतयति॥ गृहीतेति। यस्यं दे अस्फुरत्॥ तदुक्तं वसंतराजे॥ चक्षुर्वामंम्र
गदृशो जयकारि भृशं त्वरा॥ तदेव पुरुषस्यारात्स्फुरितं भयशासनमिति॥१७॥ स्मरहरधनुः सज्जं कुर्वति पृथ्व्यादीनि भुवना
न्यधो यास्यंतीत्याशंक्याह॥ इदं द्वितयं पृथ्वी भुजंगमश्चेति। तस्मिंस्त्रितये तस्मिन् त्रितये भूभु[illegible]
रुतेति॥१८॥ अत्र भूतार्थे पातीत्यादि वर्तमाननिर्देशः कवेस्त्रात्कालिकानुभवेन॥ फटायां तु फणा द्वयोरित्यमरः॥ बृंहित
करिगर्जितमित्यमरः॥ पुरजित् त्रिपुरजेतुः रुद्रस्य॥१९॥ अथ धनुर्भंगे नानारसानुभावाश्चित्ररसं दर्शयितुं पद्यमवतार
ति॥ उत्क्षिप्तमिति॥ कौशिके वत्सरसो जातः॥ अत्र हर्षः संचारी। हर्षात्पुलकाः सात्विका इति ज्ञानं भूपेषु भयानकरसः॥ अ

गृहीतहरकोदंडे रामे परिणयोन्मुखे॥ यस्यं दे नयनं वामं जानकीजामदग्न्ययोः॥१७॥ पृथ्वी स्थिरा भव भुजंग
म धारयैनां त्वं कूर्मराज तदिदं द्वितयं दधीथाः॥ दिक्कुंजराः कुरुत तत्त्रितये दधीर्षां रामः करोति हरकार्मुकमाततं
ज्यं॥१८॥ रामे॥ पृथ्वी पाति विनम्रता फणपतिर्न्यग्रं फलं मंडलं बिभ्रत्क्षुभ्यति कूर्मराजसहितो दिक्कुंजराः कातराः॥
आतन्वंति बृंहितं दिशि भटैः सार्धं धराधारिणः कंपंते रघुपुंगवे पुरजितः सज्जं धनुः कुर्वति॥१७॥ उत्क्षिप्तं सहकौ
शिकस्य पुलकैः सार्द्धं मुखैर्नामितं भूपानां जनकस्य संशयधिया साकं समास्फालितं। वैदेहीमनसा समं च सहसाकृ
ष्टं ततो भार्गवप्रौढाहंकृतिदुर्मदेन सहितं तद्भग्नमैशं धनुः॥२०॥

त्रैदैन्यं संचारी। दैन्याद्देवमुखनमनं॥ अत्र भीषणा द्विविधस्तत्र प्रभावेनैव रामे भीषणत्वं जनके करुणरसः॥ जातः अत्र
ग्लानिः संचारी। सा चाद्ये जाता॥ आद्यानुभावः संशय इति ज्ञानं॥ वैधव्यां मधुररसो जातः॥ मन आकर्षणमेवात्रा
नुभावः रामे वीररसः॥ अत्र स्पर्द्धा दीपनं सा परशुरामगतेति ज्ञानं॥ अत्र सर्वेरसानामुद्दीपनविभावो रामगरव॥२७

धनुषो महत्त्वानुवर्णनेन रामे महत्त्वमवतारयति॥ शंभोरुद्ग्रेयद्गुणवल्लरीं प्रत्यंचिकां आकृष्य कर्णांतिकं उपनयति सति तदा त्रिपुरावरोधसुदृशां कर्णोत्पलग्रंथयः श्रथयंति यदा चेमां गुणवल्लरीं उन्मुच्य परित्यज्य स्वमात्मीयं प्रकोष्ठकं आस्फाल यति॥ तदा तासामेव विधुरसुदृशामेव वलयानि कंकणानि भिद्यंते॥ शीर्यंते तदीदृशधनुरीशस्य [illegible] मिति निमहत्त्वं॥ ननु अतद्धनुस्तत्यापनमात्रमेवपणः किमर्थं तद्रामेण भग्नमिति चेत आह॥ तद्ब्रह्मेति॥ तदैशं धनुः रामकरतीर्थे देहमुमोच त्यक्त वान् किमर्थं निजपुरस्मरणाय यापप्रणाशनार्थं कुयात्र ब्रह्मा च माता च ब्रह्ममातरौ तयोर्वधस्तेन पातकि नौ यौ मन्मथा

शंभोर्यद्गुणवल्लरीमुपनयत्याकृष्य कर्णांतिकं श्रथ्यंति त्रिपुरावरोधसुदृशां कर्णोत्पलग्रंथयः॥ स्वं चास्फाल यति प्रकोष्ठकमिमामुन्मुच्य तासामहो भिद्यंते वलया निदाशरथिना तन्यमैशं धनुः॥२१॥ तद्ब्रह्ममात्ववधपात कमन्मथारिक्षत्रांतकारिकरसंगमपापभीत्या॥ ऐशं धनुर्न्निजपुरस्मरणाय नूनं देहं मुमोच रघुनंदनपाणितीर्थे २२॥ त्रुत्यद्धनुर्निनादः॥ त्रुत्यन्नीमधनुः कठोरनिनदस्तत्राकरोद्विस्मयं त्रस्यद्वाजिरवेर्मार्गगमनं शंभोः शिरःकं पनं॥ दिग्दंतिस्खलनं कुलाद्रिदलनं सप्तार्णवोन्मीलनं वैदेहीमदनं महाधदमनं त्रैलोक्यसंमोहनं॥ २३॥ ॥

रिक्षत्रांतकारिणौ शिवपरशुरामौ तयोः करसंगमाद्यः संसर्गपापस्तन्नीत्या॥ अन्योपि पापः तीर्थे देहं त्यक्त्वा शुद्धो भ वतीति प्रसिद्धं॥ २२॥ तत्रतस्मिन्नवसरे त्रुत्यन्नत्यमानं भीमो रुद्रस्तद्धनुस्तस्य कठोरः परुषो यो निनदः स विस्मय माश्चर्यमकरोत्॥ तदेव घोनयति॥ त्रस्यंतो वाजिनो यस्यासौ त्रस्यद्वाजी स चासौ रविश्च तस्य श्रवणमात्रेण त्रस्ताश्व स्य रवेर मार्गगमनं मकरोदिति सर्वत्रानुवध्यते॥ ससानामर्णवानामुच्चैराकाशे मेलनं मैक्यतानतु भूमौ॥ तथा सतिभू लयः स्यात्॥ एतन्यद्येनाद्भुतरसो दर्शितः॥ उक्तं च मदीयरसोदधौ॥ यामोश्चित्ते विभावैः पुष्टिं जाता रतिर्हि विस्मयजा॥ रसोद्भु तारव्यः स स्यात्कश्चोपि स्याद्विभावो त्र॥ २३॥

तमेवाद्भुतरसं विशिनष्टि॥ नुंधन्निति॥ आर्यो रामस्तस्य भुजतले नद्दलन् भज्यमानः यः कोदंडो धनुः तस्य कोलाहलः शब्दाडंबरः॥ अयमुन्मीलति प्रकटी भवति किं कुर्वन् विधेर्ब्रह्मणः अष्टश्रुतीः कर्णान् नुंधन्नाद्दरावन्॥ अष्टौ दिशः मुखरयन् प्रतिध्वनि नादयन्॥ वाचालिताः कुर्वन् महेश्वरस्याष्टमूर्तीः क्रोडयन् व्याकुलयन्॥ तथा चागमे भूर्जलं वन्हिराकाशं वायुर्यज्वा शशी रविः इत्यष्टौ मूर्तयः शंभोर्मंगलं जनयंतु वः इति॥ अष्टौ कुलक्ष्माभृतः कुलगिरीन् दलयन् विस्फोटयन्॥ नानाह्यागमः॥ विजयः

नुंधन्नष्टविधेः श्रुतीर्मुखरयन्नष्टौ दिशः क्रोडयन्मूर्तीरष्ट महेश्वरस्य दलयन्नष्टौ कुलक्ष्माभृतः॥ तान्यक्ष्णा बधिराणि पन्नगकुलान्यष्टौ च संपादयन्नुन्मीलत्ययमार्यदोर्वलदलत्कोलाहलः॥ २४॥ जामदग्न्यः॥ नुंधन्नेरवधनुःकोलाहलामर्षमूर्छितः प्रलयमारुतोद्धूतकल्पांतानलप्रहीं सरोषानलः॥ यद्भंजजनकात्मजाकृते राघवः पशुपतेर्महद्धनुः॥ तद्गुणरवेण रोषितस्त्वा जगाम जमदग्निजो मुनिः॥ २५॥

कुमुदो नीलो निषधो हिमवानयः॥ जयंतः कालनिषधो वाहीकोष्टौ दिग्गजाः॥ पन्नगकुलान्यपि तन्नैव। नागसर्पोरगाख्यश्च रेररूकविजिह्मगो। मायिकामृतपालेच शरखाख्याः सर्पजातयः॥ सर्पेति प्रोदितः सर्वेषु यथा पंकजं स्थलजेष्वपि॥ भित्त्वा भूतलमिति पद्य मत्रैके पठंति तत्र क्षिप्रमस्ति। नुंधन्नेनेनैकार्थत्वात्॥ २४॥ यदुक्तं जामदग्न्यस्य रामेन न त्रस्फुरणं तत्फलं विज्ञापयितुं पद्यमवतारयति॥ सुगमं॥ २५॥

तमेवानुवर्णयति मुनिराजगामेति पूर्वेण संबंधः ॥ पृष्ठतस्तूणीद्वयं निषंगयुग्मं धत्ते धत्तः एतेन सर्वं द्वितीयांतं योज्यं पुनः श्वित्र
तिलकोमृगः मंजिष्टयारक्तं मांजिष्टकं वासः ॥ उक्तं च ॥ ब्रह्मव्रतधरो वासो वसीता रक्तमुत्तममिति पराशरः किंविशिष्टो मुनिः दंड:
अर्शआदिभ्योच ॥ अथास्तो दंडोस्यास्तीति [illegible]
नः किंविशिष्टः पैप्पलः ॥ पिप्पलो ब्रह्मसूत्रमस्यास्तीति पैप्पलः ॥ स्वार्थे तद्धितः ॥ अर्शआदिभ्योच यज्ञोपवीतवानिति ॥ अश्व
त्थे यज्ञसूत्रे च पिप्पलोस्त्री गुणेष्वपीति धरणिः ॥ दंडं पैप्पलमिति पाठे ॥ आश्वत्थं दंडं धत्तं बिभ्रियात् पैप्पलं दंडं ब्रह्मसूत्रधरः
सदेत्युक्तत्वात् ॥ अपरः पैप्पलो दंडस्तं धत्त इति वार्थः ॥ समुच्चयोयमलंकारः ॥ पदार्थानामनेकेषां यत्रैकस्मिन्निबंधनं ॥ एकया

चूडाचुंबितकंकपत्रमभितस्तूणीद्वयं पृष्ठतो भस्मस्निग्धपवित्रलांछितमुरो धत्ते त्वचं रौरवीं ॥ मौंज्या मेखलया नियंत्रि
तमधोवासश्च मांजिष्ठकं पाणौ कार्मुकमक्षसूत्रवलयं दंडोऽपरः पैप्पलः ॥ २६ ॥ आजन्म ब्रह्मचारी पृथुलभुजशिलास्तंभविभ्राजमानज्याघातश्रेणिसंज्ञांतरितवसुमतीचक्रजैत्रप्रशस्तिः ॥ वक्षःपीठे घनास्त्रव्रणकिणकठिने संक्षणुवानः
पृषत्कान् प्राप्तो राजन्यगोष्ठीवनगजमृगयाकौतुकी जामदग्न्यः ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥

क्रियया वित्ते सः प्रोक्तो तिसमुच्चयः ॥ वैरिणो रपि वीरस्यांतरस्य योरत्र युक्तायोजनमदोषाय युक्त्या कृतोपि संयोगस्तयोर्वादं
न दुष्यतीत्युक्तत्वात् २६ ॥ एवंभूतो जामदग्न्यः संप्राप्त इत्यन्वयः ॥ पृथुलौ मांसलौ भुजावेव शिलास्तंभौ तयोर्विभ्राजमाना
या ज्याघातश्रेणी प्रत्यंचिकास्फोटपंक्तिस्तस्याः संज्ञया सूचनेनांतरितास्तिरोहिता पिता पृथ्वीचक्रस्य विजयप्रशस्ति
र्येन सः ॥ नामसूचनयोः संज्ञेति विश्वः ॥ वक्षःपीठे पृषत्कान्वाणान् संक्ष्णुवानः तीक्ष्णीकुर्वाणः किंविशिष्टे घनानि या
न्यस्त्राणि तेषां व्रणैर्यः किणः मांसास्थिविवर्जः तेन कठिने ॥ मांसास्थिगमरणं किण इति धरणिः ॥ क्षत्रियव्राता एव वन
गजास्तद्धननार्थं या मृगया तस्यां कौतुकमस्यास्तीति ॥ २७

10

एवंभूतमेनंदृष्ट्वालक्ष्मणोरामंस्मारयति॥हेएमायंसोत्ति॥सकः॥योभैरवसंगरेतिभयंकररणेउद्धतमनम्रंयथास्यात्तथाकुठारेण
परशुनाअर्ज्जुनस्यराज्ञःकंठंछित्वापूर्वंमूलादुत्कृत्यपश्चात्जवाद्वेगेनवाहुसहस्रंकांडंकांडस्वंडंखंडंअखंडवत्॥नन्वर्जुनोऽल्प
वलइतिचेतत्राह॥सप्तभिःसमुद्रैःमुद्रितावेष्टितायामहीतस्याःपालकस्यकिंविशिष्टंकंठं॥अतिजरमतिकठोरं॥समौजरठकर्क
शावितिविश्वः॥कीदृग्वाहुसहस्रंरेवानर्मदातन्नीरनिरोधायहेतुभूतंगहनं॥स्त्रीभिःक्रीडन्येनभुजसहस्रेणसरित्प्रवाह
मेवारुणत्तन्तुजसहस्रमितिकेनहेतुना॥खंडयत्॥वर्षीयसावृद्धिंगतेन॥पितृवधजन्यक्रोधेनेत्यर्थः॥२८॥रामंस्मारपित्वा

सोऽयंसप्तसमुद्रमुद्रितमहीपस्यार्ज्जुनस्योद्धतंछित्वाभैरवसंगरेतिजरठंकंठंकुठारेणयः॥रेवानीरनिरोधहे
तुगहनंबाहुसहस्रंजवात्कांडमखंडयत्पितृवधामर्षेणवर्षीयसा॥२९॥येनत्रिःसप्तकृत्वोन्वयबहुलवसा
सांद्रमस्तिष्कपंकप्राग्भारेकारिभूरिक्षतरुधिरसरिद्वारिपूरेभिषेकः॥यस्यस्त्रीबालवृद्धावधिनिधन
विधौनिर्दयोविश्रुतोसौराजन्योच्चांसकरक्रथनपटुरटद्धोरधारःकुठारः॥३०॥

पुनस्तत्परशुंस्मारयति॥यस्यपरशुरामस्यासौकुठारोविश्रुतःसर्वतोविख्यातः॥सोयमिति॥पूर्वेणैवसंबंधः॥
असौकः॥येनकुठारेणस्त्रीबालवृद्धावधिस्त्रियश्चवालाश्चवृद्धाश्चतत्पर्यंतंयद्धननविधानंतस्मिन्सप्तकृत्वेसतिभू
रिक्षतरुधिरसरिद्वारिपूरेऽभिषेकःसर्वहननव्रतपूर्तिस्नानंअकारि॥पूर्णाकावार्तेतिभावः॥किंविशिष्टेवारिपूरे॥
नृपाणांयावल्लीवसामांसश्चमस्तिष्कंभेजीकाचतेषांप्राग्भारःसंमर्दोयस्मिन्॥शीर्षण्यमासोमस्तिष्कमितिवि
श्वः॥प्राग्भारव्रजसंमर्द्दाइत्यपि॥किंविशिष्टःकुठारःराजन्यानांउन्नतांसाएवकूटागिरयः॥तेषांक्रथनेहार
णेपटुर्धीरटंतीघोराधारायस्यसः॥क्रथनोन्नासनान्यपीतिअमरः॥२७॥

जामदग्न्यः क्रोधं नाटयित्वाह ॥ भो मुने मन्मथोन्माथिनः रुद्रस्य तद्धनुर्मध्ये वमामुपश्लिष्य मामासाद्य द्वेधा कृतं मध्य
तो भग्नं दृश्यते ॥ औपश्लेषिकोयमाधारः ॥ भुवि एवं सति भूमौ एवं धनुर्भंगः कृतः सति वर्त्तमाने अन्यत्सुगमं ॥ समौ नि
र्मोकिकंचुके ॥ म्लानं शत्रूणां हर्षं सयकाशि त्रिपुरमिंधनं हात्यं यस्य तत ॥ ३० ॥

केनेदं कुपितकालदन्तपत्रान्तरालमिच्छता धनुर्भग्नं भोः ॥ रामः साशंकं ॥ पार्वत्या
निजभर्तुरायुधमिति म्लानं परं भ्यर्चितं निर्मोकेन च वासुकेन वलितं यत्सारदृढं नेदि
ना ॥ भव्यं यत्त्रिपुरेंधनं धनुरिदं तन्मन्मथोन्माथिनः सत्यैवमयि रामनाम्नि भुवि द्वेधा
कृतं दृश्यते ॥ ३० ॥ जामदग्न्यः ॥ स्फीतफूत्कारप्रफुल्लनासापुटकोटरोद्गीर्णप्रभूतरोषा
नलोच्छलितकालकूटधूमस्तोमाच्छादितदिङ्मण्डलः ॥ अरेरे निजकुलकमलिनीप्रा
लेयवर्ष दाशरथे कथमकांडप्रचंडदोर्दण्डकोदंडखंडनचंडिमाडम्बरेणापूरितजगत्त्रयं ॥
सकलवसुमतीमंडलाखंडलकुमुदिनीपस्य लक्ष्मीहरणकिरणमालिनं वेत्सि येनोक्तः

रेरे इत्याक्षेपे ॥ अकांडमनवसरे प्रचंडौ यौ दोर्दंडौ तयोः कोदंडखंडनरूपो यश्चंडिमा चंडत्वं तदाडंबरेण जगत्त्रयं कथ
मापूरितं ॥ कांडोस्त्री दंडबाणार्थवर्गावसरवारिषु इत्यमरः ॥ ज्ञातं त्वं मां त्वं न वेत्सि किं भूतं सकलभूमंडलस्य आखंड
लाः ये राजानः तेषां पसस्य या लक्ष्मीः राज्यादिरूपा तद्धरणाय सूर्यं ॥ तं कं ॥ तं कं येन कार्यवीर्योऽन्वप इत्युक्तः ॥ ३१ ॥

तदेवाह ॥ सहस्रेति ॥ तर्क न्यायमन्यत्सुगमं ॥ ३२ ॥ हे मंद कार्याकार्यमूढ मत्स्वभावः सर्वभूतैर्न विदितो न ज्ञातो
[illegible]
मत्क्षत्रसंतानैर्ये रोषस्तस्माद् गर्भानपि उत्कृत्य उत्कृत्य उदारान्निःसार्य निःसार्य संकलयितुं खंडयितुं उद्दाम
स्य गतदयस्य पुनः सर्वत इति सर्वान् पृथ्वीरहत कृणकृपा आजवस्यान् राज्ञो वंशेषु ये तान् क्षत्रियान् एकवि

सहस्रबाहुस्त्वमहं द्विबाहुस्त्वं सैन्ययुक्तोऽस्म्यहमेक एव ॥ त्वं चक्रवर्ती मुनिनंदनोऽहं तथापि नो पश्यतु
तर्ककर्म ॥ ३२ ॥ उत्कृत्योत्कृत्य गर्भानपि शकलयितुं क्षत्रसंतानरोषादुद्दामस्यैकविंशत्यवधि विश
सतः सर्वतो राजवंश्यान् ॥ पित्र्यं तद्रक्तपूर्णप्रतिवचनमहो मंद मंदायमानक्रोधाग्नेः सर्वतो न ख
लु न विदितः सर्वभूतैः स्वभावः ॥ ३२ ॥

शब्दार पर्यंतं विशसतो घातयतः पुनः पित्र्यं पितॄणामिदं पित्र्यं तर्पणादि प्रतियोगे द्वितीया ॥ मंदायमानः
क्रोधाग्निर्यस्य यथा यथा पित्र्यमकरवं तथा तथा शांतक्रोधो भवामीति भावः ॥ किंभूतं पित्र्यं सर्वत इति सर्व
यथास्यात् तथा तद्रक्तपूर्णप्रतिवचनं तेषां क्षत्रियाणां रक्तेन पूर्णं निष्पादितं प्रतिवचनं वचनं प्रतिकर
णीयं यस्मिंस्तत् पतिलकुशयवादिसूचकं वचनं तद्रक्तेनैव निष्पादितमिति भावः ॥ एवंभूतोऽपि भवता न ज्ञात
स्तदाश्चर्यं ॥ ३२ ॥

पुनराश्चर्यमेवानुवदति॥ हेराम मदीयः कुठारस्त्वत्तव स्मृतिं स्मरणविषयेन प्राप्तः किंतु प्राप्त एव॥ मामनादृत्यैतत्कृ
तमिति भावः। ममानादरणमेव महदाश्चर्यं॥ किंविशिष्टः कुठारः कृतवीर्यस्यापत्यं कार्तवीर्यश्चासावर्जुनश्च त
स्य भुजा एव विपिनं तस्य कर्तनलीलायां विदग्धः पुनस्तेजोभिस्त [illegible] सं॥ कथं [illegible]

आश्चर्यं कार्त्तवीर्यार्जुनभुजविपिनच्छेदलीलाविदग्धः केयूरग्रंथिरत्नोत्करकषणरणत्कारघोरः कुठारः॥
तेजोभिः सप्तगोत्रप्रलयसमुदितद्वादशार्कानुकारैः किं न प्राप्तः स्मृतिं ते स्मरदहनधनुर्भंगपर्युत्सुकस्य॥
३४॥ रामः सभयं॥ बाह्वोर्बलं न विदितं न च कार्मुकस्य त्रैयंबकस्य त्रैयंबकस्य त्रैयंबकस्य महिमा तत
एष दोषः॥ तच्चापलं परशुराम मम क्षमस्व डिंभस्य दुर्विलसितानि मुदे गुरूणां॥ ३५॥ अयं कंठः कुठा
रस्य कुरु राम यथोचितं॥ निहंतुं हंत गोविप्रान्न शूरा रघुवंशजाः॥ ३६॥ भो ब्रह्मन्भवता समेन घटते सं
ग्राम वार्तापि नः सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्द्धनि॥ यस्मादेकगुणं शरासनमिदं सुव्यक्त
मुर्वीभुजामस्माकं भवता यतो नवगुणं यज्ञोपवीतं बलं॥ ३७॥

इति धरणिः। बहुत्वमुत्करो व्रात इत्यपि॥ ३४॥ त्र्यंबको रुद्रस्तस्येदं धनुस्त्रैयंबकं। तन्निमेति वा पाठः। अत एव त
न्नो भाविस्तन्निमान्निःसारत्वमिति॥ डिंभमानवको शिशुरिति विश्वः॥ एतेन धनुर्भंगस्यैष त्करत्वं करास्तितं॥ ३५
इदानीं गर्भितात्क्षेपमाविष्करोति॥ अयमिति॥ सुगमं॥ ३६॥ पुनरपि सवैरग्ध्यमाक्षिपति॥ भोः ब्रह्मन्निति सुगमं॥ ३७

किंचित् सुव्यंज्ञात्वा पुनः स्तौति॥ स्त्रीष्विति॥ भो मुने प्रवीरजननी प्रकृष्टशूरमाता एव पदेन नान्या॥ कुत इत्यपेक्षायामाह॥ यस्यै वजननै गिरिजा स्पृहयांबभूवेति अहं चेदीदृक्पुत्रयती स्यामिति॥ स्पृहायां हेतुमाह॥ त्वद्दोर्वशीति॥ विशाखः शिखिवाहनः॥ त्वं क्रोधस्य क्रौंच गिरिजयार्थं गतः॥ तस्मात् मुनानुदेपराजितइति॥ ३८॥ पूर्वेषां हर धनुस्त्वया नीत मस्मदीयं इदं कार्मुकं आकर्षणेनास्य प्रधनं युद्धमिति धनंजयः॥ ३९॥ आकृष्टे धनुषि धर्षणा अनाकृष्टे पराजयइति धर्षणामर्षा

स्त्रीषु प्रवीरजननी जननी तवैव देवी स्वयं भगवती गिरिजापि यस्यै॥ त्वद्दोर्वशीकृतविशाखमुखावलोकक्रीडाविदीर्णहृदया स्पृहयांबभूव॥ ३८॥ परशुराम स्तत्राप्यसि मान्यसूयं॥ तच्चापमीशभुजपीडनपीतसारं प्रागप्यभज्यत भवास्तु निमित्तमात्रं॥ राजन्यकप्रधनसाधनमस्मदीयमाकर्षकार्मुकमिदं गरुडध्वजस्य॥ ३९॥ रामोतिधर्षणामर्षमूर्छितः पुरोजन्मानाद्य प्रभृति मम रामः स्वयमहं न पुत्रः पौत्रोवारघुकुलभुवां च क्षितिभुजां॥ अवीरं वीरं वा कलयतु जनो मामयमयन्मया बद्धो दुष्टद्विजदमनदीक्षापरिकरः॥ ४०॥ ॥ ॥

ताभ्यां मूर्छितः॥ अथ प्रभृति रामः परशुरामः मम पुरोजन्मा ब्राह्मणो न पराजयहेतुत्वात्॥ स्वयमप्यहं रघुकुलजातानां राज्ञां पुत्रः पौत्रो वा न॥ ब्राह्मणावमाननहेतुत्वात्॥ तेषां तु तद्भावाच्च॥ अतोयं भूलोकस्थो जनः अयं कौतुकार्थमागंतुकोपि देवादिगणः मां वीरं कलयतु जानातु॥ अवीरं वा॥ न शौर्यं ब्राह्मणोहमेवेत्युक्तत्वात्॥ मयादुष्टस्यास्य द्विजस्य दमनदीक्षायां परिकरः कटिस्थवस्त्रग्रंथिर्बद्धोस्ति स्यात् सज्जत्वं परिकर इति विश्वः॥ ४०

एतन्मनसि विचार्य नत्वा पुनरपि शांत्यैव वदति॥ भूमात्रमिति॥ प्रकरणार्थः सुबोध एव॥ कराक्षमुपक्षिप्यते॥ तद्यातत्र वि
जयलाभश्चयमस्तितदैश्वर्यग्रहणं आत्मनो जयघोषणं शत्रुहननश्चेति॥ तेषां तु त्वत्परा जये किमपि नास्तीत्याह॥ यन्द्रूमा
त्रेन त्वन्येल्लोकास्तत्राप्यर्णव जितं भनु सर्वाभूः तत्रापि भवादृशेन वीरेणत्वादृशे ... ग्रेणतथापि त्रिः सप्तकृत्वः प
त्येकवारं निर्जितं तत्तद्धार्यं तेल्लां त्वान्यते आच्छिद्य गृह्यतइति॥ एतावत्कथं तन किमपि दृतितत्रापि भूमा च तन नास्तीत्याह॥
किं विशिष्टेन वीरेण ददता जित्वा ब्राह्मणेभ्यो ददता एतेनैश्वर्य्यग्रहणमपि नास्ति तर्हि जयो भविष्यति सोपि नास्तीत्या

भूमात्रं कियदेतदर्णवमितं तन्निर्ज्जितं हार्य्यते यद्वीरेण भवादृशेन वदता त्रिः सप्तकृत्वो जयं॥ डिंभोयं न
वबाहुरीदृशमिदं घोरं च वीरव्रतं तत्क्रोधाद्विरम प्रसीद भगवन्नूजात्यैव पूज्योसि नः॥४१॥ द्विः शरं ना
भिसंधत्ते द्विः स्थापयति नाश्रितान्॥ द्विर्ददाति न चार्थिभ्यो रामो द्विर्नाभिभाषते॥४२॥ ॥ ॥

ह॥ अयं मल्लक्षणो जनः नव बाहुस्तरुण इति त्वं तु डिंभो वृद्धः॥ डिंभास्त्री वृद्धबालयो रिति विश्वः॥ वीरव्रतं ईदृशं घो
रं॥ बालवृद्धोपरि त्यक्तशस्त्रं हन्यान्न चक्रमीति राजनीतौ॥ कीदृशं वीरव्रतं॥ अत्रायं वृद्धजये प्यजयमेव त्वतो जयो
पि नास्ति॥ यथा कथं चिरत्युग्रं रिपुं हन्या द्विचक्षण इतिवाक्याद्वृद्धोपि हंतव्य इति चेत्तत्राह॥ हे भगवन्नूत्वं नोस्माकं जा
त्यैव ब्राह्मणजात्यैव पूज्योसि नक्षात्रेण॥ अतः पूज्यवधाभावस्तस्मात्वं क्रोधाद्विरम प्रसीद च॥ आत्मवधेनास्मद्यशो
मा हरेहीत्यभिप्रायः॥ शंक एयमलंकारः॥ उक्तं च काव्यप्रकाशे॥ यत्रोद्देशेन शब्दस्य युक्त्यान्यच्छंद्योजनं॥ अप्राप्तो
क्रियते र्थाय दुर्गायोक्तः स शंकर इति॥४१॥ इत्युक्ते प्युत्करमालस्यात्मवाणसाफल्यं श्रावयति॥ द्विः शरमिति॥४२॥

८

16

मकरध्वजः कामरूपः मकरध्वजोऽस्यास्तीवा ॥ मकरध्वजा इति पाठः ॥ स्वर्गगमनं ॥ अत्रेयं कथा ॥ रामस्य बाणो निरर्थ
कोन स्यात् ॥ चेन्मुनयेत्यजति तर्हि ब्राह्मणवधः स्यात् एतद्ज्ञात्वा परशोः स्वर्गममनमेव चिछेदेति भावः ॥ ४ ॥ अमहाक
नपा अन्यस्यापरिणयेन नवेतोऽकाविन्म मापरमणा मतिभाव ॥४॥ पूर्वाद्धं मुनिशापकोति न नरा न राया धिव
द्योतितं ॥ अनौद्धत्यं तु ब्राह्मणस्वभाव एवेति द्योतितं ॥ ब्राह्मणस्वभावश्चेदं दैन्यं च तत्र प्रणयोऽस्यास्तीति ॥ ४६ ॥ इ

रामस्तदादाय धनुः सहेलं बाणं गुणे योजयदाचकर्ष ॥ भाति स्म साक्षान्मकरध्वजाभः स्वर्गतिं प्रचिच्छेद च भा
र्गवस्य ॥ ४३ ॥ तस्थावुपमाकर्षनिताऽकारावाकर्णमाकर्णविशालनेत्री ॥ सा सूयमेछिष्ट विदेहजा सौ कन्यां कि
मन्यां परिणेष्यतीति ॥ ४४ ॥ भार्गवः सानुनयं यः कार्त्तवीर्यस्य भुजासहस्रं चिच्छेद वीरो युधि जामदग्न्यः ॥ सं
सायके रामकराधिरूढे ब्राह्मण्यदैन्यप्रणयी बभूव ॥ ४५ ॥ धावद्धूर्जटिधर्मपुत्रपरशुक्षुण्णमखिलक्षत्रिय
श्रेणी यच्छोणितपिच्छिला वसुमती कोऽस्या मधास्यत्पदं ॥ त्रैलोक्याभयदानदक्षिणभुजा वष्टंभदिव्योदयो दे
वोऽयं दिनकृत्कुलैकतिलको न प्राभविष्यद्यदि ॥ ४६ ॥

दानीं मुनिः श्रीरामं स्तौति ॥ धावद्धूर्जटीति ॥ यद्ययं देवो रामः न प्राभविष्यत् ॥ नावतरिष्यत् ॥ तर्हि अस्यां भूमौ पदकः
अधास्यत् ॥ कुतो न धास्यदित्यपेक्षायामाह ॥ धावन् क्षत्रवधार्थं त्वरमाणः यो धूर्जटेः रुद्रस्य धर्मपुत्रः शिष्यः स
चासौ परशुश्च तेन क्षुण्णया अखिलक्षत्रियश्रेणी पंक्तिस्तस्याः शोणितेन पिच्छिला आच्छादिता वसुमती जातेति शे
षः ॥ रुद्रशिष्यत्वेन संहारकत्वं सूचितं प्रवीणां दक्षिणो वितत इति विग्रहः ॥ उतंभने रवौ विस्मा ववष्टंभो स्त्रियामथ त्यपि ॥ अत्र
सूर्यउत्तमनं वा ॥ अन्यत्सुगमम् ॥ ४६ ॥

सत्यंयथार्थभाषणंब्रह्मवेदः तपः कायक्लेशः ॥ एतानिनिधीयंतेयस्मिन्तत्संवुद्धौ हेसत्यब्रह्मतपोनिधे ॥ भगवतः पू
ज्यस्यतवलोकोत्तरंलोकेभ्योतिरिक्तं किंकिंन अपितुसर्वमेवास्ति ॥ तदेवद्योतयति जन्मगुरुवीर्यत्यागैस्तादृशः कोपिना
स्तीतिध्वनितं ॥ अन्यत्सुगमम् ॥ ४७ ॥ महतेज ऐश्वर्यंतेजः क्षात्रंवा सुगमं ॥ ४८ ॥ [illegible]
लः शेकरध्वनावित्यपि ॥ सुगमं ॥ ४९ ॥ प्रवरदेवाभ्यः कुशोवरायेभ्यस्तेतसुरस्त्वगः देवस्त्रीसमूहानामिति ॥ रमयती
तिरमणः ॥ सचासौरतिपतिश्चतद्बाणभिन्नासतीयोगनिद्रांगतेवासीत् ॥ एतेनदिग्धप्रलयसात्त्विकोदर्शितः

रामः यस्याज्जामदग्न्यचरणकमलयोर्निपत्यउत्पतिर्यमदृश्नितः सभगवान्देवः पिनाकीगुरुर्वीर्यंततनु
यद्विरामनुपथंव्यतंहितत्कर्मभिः ॥ त्यागः ससससमुद्रमुद्रितमहीनिर्व्याजदानावधिः सत्याब्रह्मतपोनिधेभ
गवतः किंकिंनलोकोत्तरं ॥ ४७ ॥ परशुरामः सदृयं ॥ ज्ञात्वावतारंरघुनंदनस्यस्वकीयमालिंग्यततोतिगाढं ॥
विन्यस्यतस्मिन्जमदग्निसूनुस्तेजोमहत्क्षत्रवधान्निरस्तः ॥ ४८ ॥ ततस्ततः ॥ निःसाणमर्दलरसालगभीरभे
रीभांकारतालरवकाहलनादजालैः ॥ पूर्णंवभूवधरणीगगनांतरालंपाणिग्रहेरघुपतेर्जनकात्मजायाः ॥ ४९ ॥ रामे
णपाणिसकामस्पृशतिजनकजापाणिपद्मंप्रदत्तंपित्रानेत्रालिपक्षप्रवरपुरवधूमंगलानांमुहूर्त्ते ॥ तत्पाणिस्पर्शसौख्यं
परमनुभवतीसच्चिदानंदरूपंतत्रासीद्बाणभिन्नारमणरतिपतेर्योगनिद्रांगतेव ॥ ५० ॥ वैवाहिकं कुशिकनंदनजामद
ग्न्यवा ॥ ल्मीकिगौतमवसिष्ठपुरोहिताद्यैः ॥ रामोविधिंसहसमाप्यसलक्ष्मणस्तैरानंदयन्जनकजोस्वपुरींजगाम ५१

प्रथमोंकः ॥

उक्तंचरसोदधौ ॥ सुखदुःखाभ्यांचेष्टाज्ञानविलयनंयदातदाप्रलयइति । किंविशिष्टंतत्पाणिस्पर्शसौख्यंसच्चि
दानंदरूपंमोक्षसुखांतरंगमिति ॥ ५० ॥ सलक्ष्मणः रामः एतैः कुशिकनंदनादिभिः कृत्वावैवाहिकंविधिंसमा
प्यतैः कुशिकनंदनादिभिः सहस्वपुरींजगामेत्यन्वयः ॥ सलक्ष्मणइतिपदेनसीतानुजयाऊर्म्मिलयालक्ष्मणस्या
पिविवाहोद्योतितः ॥ इतिध्वनिः ॥ ५१ ॥ इतिश्रीमोहनमिश्रविरचितायांहनुमन्नाटकदीपिकायांप्रथमोंकः ॥ १ ॥

अथ तयोः संभोगमधुरं द्योतयितुं प्रथममवतारयति ॥ प्राच्येति ॥ प्रथमयामस्तु प्रवेशकौतुके न नीतः तदग्रयाम
मत्रयं मारनाराचभिन्नो नीता कथमप्यत्र हेतुमाह ॥ मारनाराचभिन्न इति ॥ अन्यत्सुगमम् ॥ सर्वलक्षणोपेतानूहे वभूपाल
योग्यान् मेदुरमंदुरायां तुरगान् अवलोक्य मारज्वराकुलितचित्त ओत्यावधूपुत्रयोर्मंगलावलोकनायागस्य मन्त्रगतस्तरणे
किरणमालिन [illegible]
दाशरथिर्जनकपुत्रीचंदं डाघातैस्तुरंगांस्ताडयामास निशायां प्रौढायां शीघ्रमावयोः संगमो भवत्वित्यभिप्रायः ॥ किमित्ये
तस्यार्थे कविरेव द्योतयति तत्र नास्म दोषः ॥ मेदुर स्निग्धचित्रयोरिति धरवलात् ॥ सीतामंदुरे चित्रे तुरंगांस्ताडयामास ॥ राम
स्तु मंदुरायां ॥ वाजिशाला तु मंदुरेत्यमरः ॥ मेदुरं च मंदुरा चेति द्वंद्वैक्यं ॥ एतेनोन्मादावस्था द्योतिता ॥ सोत्कारस्तोरं धौ ॥ प्रौढा

प्राप्यायोध्यां स्वजनपरमोत्साहसंभावनाभिर्नत्वामूर्ध्ना खिलगुरुजनं सीतया लक्ष्मणेन ॥ रामो यामत्रयमपि क
थं मारनाराचभिन्नो नीता सीता किमिति तुरगांस्ताडयामास रंद्रे ॥ १ ॥ अस्तं याते मुकुलनलिनीबांधवे सिंधुपुत्रे प्राची
भागे प्रमदमुदिते पङ्कनारिंगपिंगे ॥ रामं कामं गुरुजनगिरा मंदिरे सुंदरं त्वं रंभोरुः स्त्रीजनकतनया नंदयंती जगाम ॥ २ ॥

नंदयते विरहाद्यो हि भ्रमः स उन्मादः ॥ १ ॥ अथ तयो रतिगृहप्रवेशमाह ॥ मुकुलितायां नलिन्यां बांधवे विकाशहेतौ सूर्ये। स्तं
याते सति ॥ प्राची भागे पूर्वदिग्भागे प्रमदं यथास्यात्तथा सिंधुपुत्रे चंद्रे उदिते सति रामं नंदयंती जगाम ॥ कामम निर्लंठं यथास्यात्
तथा ॥ अकामानुमतौ कामः स्पृहायामपि संमत इति धरणिः ॥ एतेन त्र पाद्यो तिता ॥ सुंदरं रामं मंदिरं वा ॥ उक्तं अकला वि
लासे ॥ रम्यपाश्चिरवानंदनं दविचित्रकलाकुलं ॥ स्वकूनां तूलाढ्यशयनं गृहं सुरतसुंदरमिति ॥ पुनरपि सिंहावलोकनन्यायेन चं
द्रस्यमाविष्करोति ॥ तरपि विरहिण्यपि प्राचीभागे सरागे सति ॥ एतेन चंद्रदर्शनात्स्त्वपि स्त्रियः परपुरुषानुरागं कुर्वन्ती
ति ध्वनितं ॥ यतः पूर्वायादिशास्तरणिरति प्रियः सापि सरागा जातेति भावः ॥ यद्वा रतिरवेः सैव प्रियातस्याश्च सप्रियइत्यागमो कृत्वा
तु सा व काश इति गृहादिदर्शनमेव तत्रावकाशः ॥ तमसि शमं नाशं इते गते सति कोकाश्चक्रवाकास्तेषां लोके समूहे सर्वरी भूपतिश्चंद्र इति ॥ २

ननुकोकानांकुतःशोकइत्यपेक्षायामाह॥भविष्यद्रामशापेत्यंतनिकटवर्तिनिकोकलोकोनामकस्मान्महोत्पातनिमित्तं
पार्श्वस्थितानामपिप्रियाणामनवलोकतःशोकसंभवः॥३॥पुनश्चंद्रमेवविशिनष्टिस्वैरमित्यादिचतुर्भिः॥युवतीच
युवाचयूनस्तेषांमध्येकोपिस्त्रियासहकोपुमान्शिष्य इत्यइति॥कैरवं [illegible]
अन्यत्सुगमं॥४॥तत्राहयसरागंचंद्रमवलोक्यकविरुत्प्रेक्षते॥असौशशीतत्क्षणादुदयमात्रादेवफुल्लंतोयेकोर

॥ तत्रावसरेप्राचीभागेसरागेतरणिक्रांतमुद्रेसमुद्रनिद्रालौनीरजालौविकसतिकुमुदेनिर्विकारेचकोरे॥
॥ आकाशेसावकाशेतमसिशममितेकोकलोकेसशोकेकंदर्पेनल्पदर्पेवितरतिकिरणान्शार्वरीसार्वभौमः॥
॥ स्वैरंकोरककोरकान्विहल्लयन्यूनांमनःखेदयन्नंभोजानिनिमीलयन्मृगदृशांमानंसमुन्मूलयन्॥ज्योत्स्ना
॥ कंदलयंस्तमःकवलयन्नंभोधिमुद्वेलयन्कोकानाकुलयन्दिशोधवलयन्निंदुःसमुज्जृंभते॥४॥ अद्या
पिस्तनुतुंगशैलशिखरेसीमंतिनीनांहृदिस्थातुंवांछतिमानएषधिगितिक्रोधादिवालोहितः॥ उद्यन्
दूरतरप्रसारितकरःकर्षत्यसौतत्क्षणात्फुल्लत्कोरककोशनिःसरदलिश्रेणीकृपाणंशशी॥५॥ ॥

वास्तएवकोशाःखड्गचर्मकोशास्तेभ्योनिःसरंतीयाअलिश्रेणीभ्रमरपंक्तिःसैवकृपाणःखड्गंतमाकर्षतिप्रसह्यगृह्णा
ति॥दिवातत्रसुप्ताअलयश्चंद्रोदयात्पूर्वमेकैकैवसर्वेपंक्तीभूयनिःसरंतीतिप्रसिद्धं॥कीदृशउद्यन्उद्गच्छन्इतिक्रोधाद्वालोहि
तश्च॥इतिकिं॥एषमानःसीमंतिनीनांहृदिअद्यापिमय्युद्यतेपिस्थातुंवांछतिइतिकीदृशेतद्रितनावेवतुंगेशैलशिखरेपञ्चे॥५॥ ११

रागमुत्प्रेक्षस्य पांडुरतामुत्प्रेक्षते॥ यांतस्येति॥ अनंतरं पश्चांतरे शीतकरः अस्तं यातस्य दिनकृतः सूर्यस्य वेषणरागान्वि
तो जातः॥ याहगरुणो स्तरविरत्निताहगस्य चंद्रो भवतीति किं॥ कर्तुं तस्यैव [illegible]
[illegible]
तकृद्इत्यपिपाठः॥ कुमुद्वतीव नितान्तया कुमुदिन्येव चंद्रकांतातया कृतं यद्वेलस्यं लज्जातिरेकस्तेन पांडूकृतः रागान्वि
तोपि पीतत्वमागतः॥ इति केनेव हासेन॥ परगामिनमेनं दृष्ट्वाय कुमुदिनी विकशनं तदेव हासः उक्तं च॥ आत्मनस्वारिते

यातस्यास्तमनंतरं दिनकृतो वेषणरागान्वितः स्वैरं शीतकरः करं कमलिनीमालिंगितुं योजयन्॥ शीतस्य शर्मवाप्य संप्रति
तयायुक्ते मुखाभोरुहे हासेनेव कुमुद्वतीवनितया वेलस्य पांडूकृतः॥ ६॥ रामः सखीं प्रति॥ कर्पूर किं मपूरि किं मलयजै राले
पिं किं पारदेन क्षालि स्फटिकांतरैः किं मघरियावा पृथिव्यो र्वपुः॥ एतत्तर्कयके रवक्षु महरे शृंगारहीसागुरोदिक्कां
तामुकुरे चकोरसुहृद्दिप्रौढे तुषारत्विषि॥ ७॥ अमृतममृतरश्मेर्मंडलस्यानुभूय द्विजचतुरचकोर प्रीतिरंगारकेषु॥ प्रभवति भवदीयाचे द्विधातुर्विधानं तदिह पुनरयिस्यात्कोन्यथा कर्त्तुमीशः॥ ८॥ ॥ ॥ ॥

यशस्य ज्ञातेन स्थैर्यं यत्र जायते॥ अपत्रपातिमहती तद्वेलस्यमुदाहृतं॥ ६॥ द्यावाभूमी तु रोदसीत्यमरः॥ असा लिप्र क्षालि
तं किं दिकू पूर्वा सैव कांतो तस्या मुकुरे तत्तुल्ये अन्यत्स्पष्टम्॥ ७॥ अंगारकाशनं चकोरमवलोक्याह॥ अमृतमिति भो
द्विजचतुर पक्षि विदग्ध चकोर अमृतरश्मेर्मंडलस्य चंद्रबिंबस्यामृतमनुभूय चेत्त्वदीया प्रीतिरंगारकेषु प्रभवतीति
तर्हि विधातुरीश्वरस्य विधानं पुनरप्यन्यथा कर्त्तुं कः पुमानीशः स्यात्॥ नकोपीति भावः॥ ८॥ ॥ ॥ ॥ ॥ ॥

चक्रक्रीडेति क्षीरसमुद्राज्जन्मप्रादुर्भावो यस्य एवंभूतो देवश्चंद्रो जयतु॥ तमेव विशिनष्टि॥ अंधकारनिचयसेनायाः स्फारो विस्तारः तन्नाशाय चक्रं॥ आविष्टलिंगत्वात्त्वं ढत्वं राजहंस इव राजहंसः इवलोपे अच्चूडणादिकः कुमुदवनवधूनां बोधे विकासे सति निद्राया दरिद्रो यस्मात् यदुदये विकसिता पुनर्न संकोच इति भावः॥ रतिपतेर्बाणानां निर्वाणस्तीक्ष्णीकरणं तस्य शाणः उपलविशेषः यद्वा निर्वाणो मोक्षस्तस्य शाणः साहाय्यकृत् कामबाणनिर्मुक्तो सत्यां साहाय्यकृदिति भावः॥ निर्वाणस्तीक्ष्णमोक्षयोरिति चरकः॥ उत्तेजनोपलः शाणः पक्षे ध्यात्मगत पुमानिति धर

अथ पंजरस्थ मंदिरसारिकासखीनां स्वमंदिरगमनाय शिखं पठति॥ चक्रक्रीडाकृतांतस्तिमिरचयचमूस्फारसंहारचक्रं कांतासंयोगसाक्षी गगनसरसिजो राजते राजहंसः संभोगारंभकुंभः कुमुदवनवधूबोधनिद्रादरिद्रो देवः क्षीरोदजन्मा जयतु रतिपतेर्बाणनिर्वाणशाणः॥९॥ इत्याकर्ण्य चंद्रमंडलशाणोत्तीर्णा रतिपतेर्बाणा जानकीरामचंद्रयोर्वक्षस्स्थले निपतंतीति श्लोकाभिप्रायमवगम्य निःक्रांतः सर्वाली जनः॥ अत्रापि तरुणारामे शुकसारिकादीनां पक्षिणां मधुरस्वरैर्महोत्यातं सूचितं॥१०॥

णिः॥९॥ राघवः द्वारकोष्ठः द्वाराग्रभागस्य तल्लांतात् अधोभागात् जनकतनयामंके कृत्वा पर्यंकांके पर्यंकमध्ये निनाय अनयदित्यन्वयः विपुलपुलकां॥ एतेन मुख्यस्निग्धसात्विको दर्शितः॥ उक्तं च रसोदधौ॥ साक्षाद्धीश्वरयोगोपैस्ते मुख्या मनीषिभिर्ज्ञेया इति रुद्रमरतिप्रकारा ध्यायेस्युः स्निग्धा मतास्त एवात्र इत्यपि॥ शनैर्मेनसि न तु वाचा बालाया: प्रभूतरोमांच हर्षेणेन पंचबाणेप्यपरिमित बाणभ्रांतिः॥१०॥ ॥ ॥ ॥ ॥ १२

22

मानकीर्णा मां मा स्पृशेति स्याद्व्याजवचनभाषिणी भीता सहृदयत्वहृदयसहृदयं चेदेतद्धृदयं च अनिलस्त्वागताय वा योरग
स्नाय अरिः शिथिलं चकार किंभूतां पुंडरीकाक्षो रामस्तद्वक्षःपीठं कमलमुकुलं तत्सदृशं कोमलं कुचयोरपि काठि
न्यमतो कीदृशी कामैः कामसंबंधिभावैः पूर्णा ॥ कामेन कलितेव दृश्यत इत्यर्थः ॥ स्वामिनामश्लेषानुपानादि गाढं यथा

राम: ॥ अंके कृत्वा जनकतनयां द्वारकोटेस्त्वलं तात्पर्यंकांके विपुलकां
राघवोतां निनाय ॥ ११ ॥ जानकी ॥ गाढं गाढं कमलवनमुकुलं पुंडरीकाक्षव
क्षः पीठं काठिन्यमपि कुचयोर्जानकी मानकीर्णा ॥ पूर्णा कामैः शिथिल
मनिलत्वागताया चकार स्फीतं नीतं सहृदयहृदयं स्वामिनालिंग्यमत्वा ॥ १२ ॥

गाढं यथा स्यात्तथा आलिंग्य स्फीतं नीतं स्फीतारव्यचुंबनेप्रापितं ॥ तदुक्तं कामावतारे ॥ न कारवक्षुलं स्निग्धहस्तां
तं विविं ॥ ताधरं रभसा गेऽसंस्पर्शि स्फीतं तच्चुंबनमिति ॥ कमलकलिका ॥ कोमलं पुंडरीकाक्षवक्षः कुचकाठिन्ये
न व्यथितं मा भूदिति ॥ आशंकया वाक्पाशमीषदुत्सृज्य पवनप्रवेशाय तद्धृदयं शिथिलमाचकारेति भावः ॥ १२ ॥

तत्संभोगसमये भूयो भूयः नंदतो मुहुर्मुहुः रसेन वर्द्धमानयोर्यूनोर्जानकीरामयोः एष संसारो नवेव जातः ॥ अज्ञातरसप्रदो जात इति भावः ॥ गर्भे सारः सुखं यस्य सः ॥ कीदृशयोः परस्परं बाहुपाशग्रहणे यो रसातिशयः तमभिव्याप्याशालितुं शोभितुं शीलं ययोस्तौ तथा पुनः कीदृशो प्रभूतं वृद्धं अभिमतं इष्टं फलं कामफलं भुंजतोः ॥ यथेच्छा नेक कला विदग्धयोरिति ॥ पुनरित्यध्याहारः ॥ कामिनोः कामरसवर्धनविदग्धयोस्तयोरिति बाहुबंधश्च्युतः शिथिलो जातः ॥ इतीति किं ॥ रामेणो

जानकीरामचंद्रयोः ॥ अन्योन्यं बाहुपाशग्रहणात् रुचिरसभराशालिनोस्तत्र यूनोर्भूयः प्रभूताभिमतफल भुंजतोर्नंदतोर्जात एषः ॥ संसारो गर्भसारो नवइव मधुरालापिनोः कामिनोर्मां गाढं मालिंग्य गाढं त्व पिहि न हि न हीति च्युतो बाहुबंधः ॥ १३ ॥ वक्त्रे नतफणिलताहल्लवी टिकां स्वे विन्यस्य चंदनघनाढ्ततपूगगर्भां ॥ रामोऽब्रवीदयि गृहाण मुखेन बालेत छद्मना तदधरं मधुरं प्रयातु ॥ १४ ॥ ॥ ॥ ॥ ॥

कं मां इति मां गाढं आलिंग्य त्व पिहि सीतयोक्तं न हि न हि इति अत एव मधुरालापिनोः त्व पिहि न हीत्यादि माधुर्यं ॥ श्यामं कामसमाकृतिं राममालिंग्य ठत्कंठितापि कामाकुलापि जानकी कुलसंभूति त्वलज्जया न ठसंगमत याच भर्तुर्मनोहरणाय न हि न हीति व्याहृत्य दुःसहमपि मारज्वरं विषहते स्म ॥ चंदनं खदिरं घनः कर्पूरः ताभ्यामाढ्यतः पूगः क्रमुकः गर्भे यस्यास्तां चूर्णकस्तूरिका गर्भे खदिरं चंदनं मतमिति धरणिः ॥ १४ ॥

ततः किं जातमित्यपेक्षायामाह ॥ मंदमिति ॥ जनकतनयां तां वीटिकां चतुर्द्धा विधाय तत्रापि मंदं मंदं शनैः शनैस्तत्रापि स्वैरं स्व
सुखानुसारं यथा स्यात्तथा जग्रहतुर्वती ॥ चतुर्द्धात्वे हेतुः कुतस्तस्य रामस्य पद्दधरमधुतस्मिन्यत्प्रेम तस्मात् एकदैव ग्रहणेन त
द्धरापागः स्यादिति भावः ॥ मंदमंदत्वे हेतुः ॥ कीदृशी मीलिताक्षी तदधरस्पर्शानंदाभ्येन मीलने सति तद्ग्रहणायोगान्मं
दत्वं ॥ तदनु तद्ग्रहणानंतरं तस्याः वीटिकायाश्चतुरः कवलान् धर्मार्थकाममोक्षान् तत्प्राप्तिसंचक्रैकीनो मे योगमासी

मंदं मंदं जनकतनया तां चतुर्द्धा विधाय स्वैरं जग्रे तदधरमधुप्रेमतो मीलिता ॥
मेने तस्यास्तदनु कवलान् धर्मकामार्थमोक्षान् रामः कामं मधुरमधरं ब्रह्म पी
त्वापितस्याः ॥ १५ ॥ जानकी तनोवकाशमासाद्य ॥ भाति स्म चित्तस्थितरामचंद्रं
सारुंधती निर्गमशंकयेव ॥ स्तनोपरिस्थापितपाणिपद्मा छद्मांतनिद्रा सरसीरुहाक्षी

१६

मान्येन रामोपितस्याः सीतायाः मधुरमधरं पीत्वा तदेवाधरं ब्रह्मानंदसमं मेने ॥ एतदधिकं ब्रह्मसुखं नास्तीति भा
वः ॥ १५ ॥ छद्मना मिषेण स्वीकृतनिद्रा सा भाति स्म ॥ स्तनयोरुपरिस्थापितं पाणिपद्मं यस्याः साउत्प्रेक्षते ॥ किं कु
र्वतीव ॥ चित्ते स्थितश्चासौ रामचंद्रश्च तं निर्गमशंकया तद्दयान्मा निर्गच्छत्विति भयेन रुंधतीव ॥ १६ ॥ ॥ ॥
॥ ॥

स्तनमध्यदेशस्तद्युके स्वेदे पोमलयजपंकस्त। स्मिन्निम
कामाग्निनामुंच्यन्योरमणीयः कांतायाः सीतायाः कुचांतः स्तनमध्यदेशस्तद्युके स्वेदे पोमलयजपंकस्त। स्मिन्निम ग्नोलिप्तो मरोलक्ष्यते कीदृशः गाढं यथास्यात्तथा वद्धा अखिला अंगु योयस्य अत एवोपरिविततोपक्षौयस्य उडुनां
[illegible]
पक्ष्माजेन भावाविःकरणदंभेनाश्रिता निद्रा यथासा॥ अन्यथावेपात्यं मायाति॥ [illegible] कीदृशी मंदं यथास्यात्तथा पृथुलं मांसलं यज्जघनस्य भारस्तं आंदोलयंती तोलयंती तोल
तीति॥ हर्षप्रय॥ रमेवाह कीदृशी मंदं यथास्यात्तथा पृथुलं मांसलं यज्जघनस्य भारस्तं आंदोलयंतीतोलयंतीतोल
यंती पुनर्मृदुनि स्पर्शार्हाणि चंचलानि अलकाग्राणि यस्याः प्रकटितं भुजमूलं यया दर्शिता स्तन्यलीलास्तनयोः
दमनदहनशुष्यत्कांतकांताकुं
रामः॥ तत्र मिथिलसुतोरस्थल निक्षिप्तपक्ष्म कर्दमे सानंदं मंदिरामालोक्य॥ दमनदहनशुष्यत्कांतकांताकुं
चांतस्वेदमलयजपंकेगाढवद्धाखिलांघ्रिः॥ उपरिविततपक्ष्मोलक्ष्यते लिप्तनिर्मग्नः शरदइवकुसुमेषोरेषपुंखा
प्रकटि
वशेषः॥१७॥ तत्रावसरे॥ पृथुलजघनभारं मंदमांदोलयंती मृदुचलदमैलकाग्रा प्रस्फुरत्कर्णपूरा॥ प्रकटि
तभुजमूलादर्शितस्तन्यलीला प्रमदयति यतिद्रा कूजानकी व्याजनिद्रा॥१८॥ तामपि हृदस्थां मत्वा नः॥ त
स्तनतरभुजमूलोरस्थलरोमराजी
दनुजनकपुत्रीवक्त्रमालोक्य रामः पुनरपि पुनरेवाघ्राय चुंबन्नतत्पः॥ स्तनतरभुजमूलोरस्थलरोमराजी
मदनसदनमासीच्चुंबितं पंचबाणः॥१९॥
प्रमीलादंभतोयत्र प्रीतिद्राना द्विर्तिस्तया॥
परिसरशोभायया॥ एतत्पद्येनकुंचितास्व्यंशयवंदर्शितं॥ तदुक्तं कामावतारे॥ प्रमीलादंभतोयत्रप्रीतिद्रानाद्विर्तिस्तया॥
स्वशोभादीयते तेन प्रेशयनंतद्विकुंचितं॥१८॥ तदनुव्यानविःकृतभावदर्शनामंतरं रामः जनकपुत्रीवक्त्रं आलोक्य पुनः पु
नराघ्राय चुंबन्नपितृप्तोनजातः॥ स्तनतरभुजमूलोरस्थलं रोमराजी मदनसदनं चापि रामेण चुंबितमासीत् इति॥
अत्र हृदैक्यं॥ कीदृशः पंचबाणः कामोस्यास्तीति तथापि सकामइति स्पर्शाद्याहिभ्योच॥ एतेन पंचशरास्व्यं चुंबन
द्योतितं॥ तदुक्तं वात्स्यायनीये॥ भुजमूलं स्तनौ वक्षो वलिं मदनसद्म च॥ पद्मिनी चुंबिताद्राव्यं याति पंचशराभिधः॥१९॥

१

अथ भयलोलत्वालिंगनं द्योतयितुं पद्यमवतारयति॥ निद्रालुरिति॥ ते प्रसिद्धाः कामिनः सकामाः श्रीरामपादाः जघन
मेघे गिरिदरीसैलाश्रयं निलयनस्थानं श्रयंते आश्रयंतइति॥ कुत इति पृच्छायामाह॥ निद्रा जाता यस्याः एवंभूतायास्त्रीसी
नातस्या निनवावस्त्राकर्षण सति रणनीलाकृतायां नखलीलानस्याः रावपाधावन्यः [illegible]
नयो व्यतिकरो भयं तेन तरलः॥ आत्मानं गोपयितुं चंचलाः॥ अन्योपि चौर्यं कर्तुं केनापि ज्ञातो लंपलायितुं आत्मानं

श्रीरामपादाः॥ निद्रालुस्त्रीनितंबांबरहरणरणन्मेख
लारावधावत्कंदर्पारब्धबाणव्यतिकरतरलाः कामिनो
यामिनीषु॥ तारंकोपांतकांतग्रथितमणिगणोद्गच्छद
च्छप्रभाभिर्व्यक्तांगास्तुंगकंपाजघनगिरिदरीमाश्रयं
ते श्रयंते॥२०॥

गोपयति॥ तथैते यिकामचौर्यं॥ अन्यस्मिन्नन्याभासो व्यतिकरः॥ अत्र निर्भयत्वभयं॥ नहिं निलीयतिष्टंतु इतिचेत्तत्रा
ह॥ तारंकयोरुपांतेषु ग्रथिता ये मणिगणाः रत्नसमूहास्तेभ्य उद्गच्छंत्यायाउज्वलाः प्रभादीप्तयः ताभिर्व्यक्तांगाः प्रकटी
कृतशरीराः॥ अतएव ज्ञातेषु सत्सु तुंगः कंपो येषां ते एवंभूताः संतः आश्रयं श्रयंते॥ उक्तंच कामावतारे निर्निद्रिताम्र
गदृशेगरसानां येद्वसमोचनायविभयीकृतमानसोंतं॥ तद्भावकंयमुखतो जघने निलीयमास्थापयति तद्भयलोलमुक्तमिति॥
॥२०॥

भावंमानसंरागं॥ अन्यत्स्पष्टमेव॥ प्रेमतः संगंस्पृहयतिबालभावाद्बिभेतीतियोन्यं॥ हेरमणकामतः स्वसुखानुसारंनिर्वि
शंकंयथास्यात्तथामेरसनांपिबपिब आदरेवीप्सा॥ अत्रत्वादनमेवपानंननुरमित्वाकथयामीतिचेतत्राह॥ प्रियायाम
म्चेतः रभसशंकातंकिरभसोरताधिक्यंततोयाशंकाभयंतेनातंकः कंपोयस्मिन्नूततन्॥ एवंभूतेयातं॥ रमणायाऽसमा
स्मीतिभावः॥ यद्वासर्वमेकपदं॥ रमणस्यतवयोरभसोरताधिक्यंतस्माद्याशंकातयायआतंकस्तद्युक्तंयथ्वेतत्त
द्देवप्रियंयस्यामे॥ कुतोनक्षमासीत्यपेक्षायामाह॥ निधुवनेरतेयाघनावल्लीकेलीस्तयाद्रावणादिनाग्लानिभावं

जानकीप्रबुद्धा॥ स्पृहयतिचविभेतिप्रेमतोबालभावान्मिलतिसुरतसंगेप्यं
गमाकुंचयंती अहहनहिनहीतिव्याजमप्यालपंती स्मितमधुरकटाक्षैर्भावमाविः
करोति॥ २१॥ अत्यंतकामवाणभिन्नसतीवीतलज्जाजानकी॥ निधुवनघनकेलि
ग्लानिभावंभजंत्यारमणरभसशंकातंकिचेतः प्रियायाः॥ अधरदशनसर्पत्सी
त्कृतायाधृतायाः पिबपिबरसनांमेकामतोनिर्विशंके॥ २२ ॥ ॥ ॥

निः प्राणतांभजंत्याः॥ उक्तंचरसोदधौ॥ ओजश्चांद्दहेयतद्वलपुष्टिकृन्दवहस्य॥ तद्विगमाद्दत्याधिश्रमैर्निः प्राणताग्लानिः॥
निः प्राणतांभजंत्याः॥ उक्तंचरसोदधौ॥ ...
पुनः कीदृश्याः॥ अधरस्यदशनंखंडनंतेनसर्पन्निर्गच्छन्सीत्कृतंसीत्कारशब्दोयस्याः यद्वाअधरदशनयोरधरदंतयोरेव
सर्पत्सीत्कृतंयस्याः उक्तंचपंचसायके॥ द्रवतिचयदिनारीप्रौढरागानियुक्ताम्रदुनिधुवनयोगेदंतसंधौसमीरं॥ द्रवति
ररनवासः किंचिदुन्मथ्यभूयः कथितमिहमुनीन्द्रैः सीत्कृतंरागकारि॥ अस्मिन्नयसीत्कृतमाविःकृतं॥ पुनः धृतीयाः
अके॥ वश्यप्रेष्ठेयंनायिका॥ उक्तंचरसोदधौ॥ साकूताभिमुखेयस्याः सततंप्रियोभवेदनुगः॥ वश्यप्रेष्ठासोक्ताव्रजरमणीमंडनं

रसिकप्रि ॥ ४४

28

रामराज्ञी चरस्थावरां स्थाणु चरश्च रूपां धरित्रीं सुरभयति सुरभीकरोति ॥ केन वाचां गुंफेन रचनया। सन्दर्भो रचना गुंफ
इत्यमरः ॥ कीदृशेन गुंफेन रंभाया अप्सरसस्तस्याः करावेव कमले तयोर्दोलान्यंगुलयस्तासां यउद्गार अप्रमादकान्संचार
त
आतिशयेन रसवान् यउद्गारउद्गाराख्यगीतं तस्मिन् ताराणि व्यक्तानि अक्षराणि यस्मिंस्तेन ॥ उक्तं संगीते ताल
पंचमश्रीकप्रतिमंठविराजितं। त्रिपदं सध्रुवं गीतमुद्गाराख्यं मतं बुधैरिति ॥ पुनः कीदृशेन प्रत्यग्रं नवीनं उन्निद्रं धिक
सितं च तन्नाकद्रुमकुसुमं पारिजातपुष्पं तस्य यो नवामोदस्तात्कालिको गंधः सहवयासंवादमैत्रीवचनचातुरीतस्याः

रामः सानंदं ॥ जानकीवाग्विलाससमुल्लालयति लालित्यशालिनालापेन ॥ वाचां गुंफेन रंभाकरक
मलदोलोद्गारसंचारस्वंचतंचीसंजातमंजुस्वरसरसतरोद्गारताराक्षरेण ॥ प्रत्यग्रोन्निद्रनाकद्रुमकुसुम
नवामोदसंवादमैत्रीपात्रीभूतेनर्धरश्री सुरभयति चरस्थावरां रामराज्ञी ॥२३॥ आरण्यं सारंगैर्गिरिकु
हरगर्भाश्च हरिभिर्दिशो दिग्मातंगैः श्रितमपि च पंकजवनैः ॥ प्रिया चक्षुर्मध्यस्तनवदनसौंदर्यविजितैः
संतामानेम्लाने मरणमथवा दूरशरणं ॥२४॥

पात्रीभूतेन पारिजातकुसुमादप्यतिसुगंधेनेत्यर्थः ॥२३॥ अथ रामस्तामाल्हादयति ॥ सारंगैर्मृगैः हरिभिः सिंहैर्मा
तंगैर्गजैः पंकजवनैः पद्मव्रातैः वनं जलं ॥ जीवनं वनमित्यमरः ॥ कीदृशैः सर्वैः प्रियायास्तव चक्षुः सौंदर्येण मृगाः म
ध्यप्रदेशसौंदर्येण सिंहाः स्तनसौंदर्येण गजकुंभाः वदनसौंदर्येण कमलवनं विजितमिति मृगादिभिररण्यादिश्रयणं
युक्तमेवेत्याह। सतां सभाविता नामानेचितो जातो म्लाने सति केनापि दूषिते सति ॥ मरणं मुख्यं तदभावे दूरशरणं देशां
तरदुर्गाश्रयणं वा योग्य॥ अत एव दुर्गमाश्रितमिति भावः ॥२४॥

अयीति कोमलामंत्रणे॥ अयि प्रिये वा तत्र संभावना। गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्यमरः॥ सरसीरुहाणि
पद्मानि एणीदृशस्तव वक्त्रं विलोक्य तत्सौंदर्यार्थं वनांते जलमध्ये जपानुष्ठाराधनाय भृंगश्रेणीरूपां समालां तां जगृहुः॥
एणीदृशा इति पदेन मुग्धो॥ पि वनांते॥ रराय मध्ये तं णभक्षणाद्दिना नेत्रशोभार्थं तपस्यंतीति ध्वन्यर्थः॥ भुजंगाधिप
तिरपि ते वेणीमवलोक्य तत्सादृश्यहीने अंगं जुगोप॥ अन्यथा शाश्वद्दोपनेनकोला भइति॥ यद्वा एणीदृश इति पदद्वये॥
एणी मृगी जात्येकवचनं॥ तद्दृशोर्दृष्टीरवलोकन नवेदृग्ध्यानेकत्वाद्द्विवचनं अवलोक्य वनांते रण्यदुर्गे अंगं नेत्ररूप
मंगं जुगोप॥ त्वन्नेत्रसादृश्याभावेलज्जस्यत्वात् २५॥ सुष्टुवर्णो यस्य एवंभूतमपि स्वर्णं तव कांतिं विलोक्यात्मगतमला

अयि प्रिये॥ वक्त्रं वनांते सरसीरुहाणि भृंगाक्षमालां जगृहुर्जपाय॥ एणीदृशस्तेप्यवलोक्य वेणी
मंगं भुजंगाधिप एति जुगोप॥२५॥ स्वर्णं सुवर्णं दहने स्वदेहं चिक्षेप कांतिं तव दंतपंक्तिं॥ विलोक्य तूर्णं
मणिबीजपूर्णं फलं विदीर्णं ननु दाडिमस्य॥२६॥ वदनममृतरश्मिं पश्य कांते तवोर्व्यामनिलतुलनदंडे
नास्यवाञ्छीद्विधाता॥ स्थितमतुलयविंदुः खेचरो भूल्लघुत्वात् क्षिपति च परिपूर्त्यै तस्य ताराः किमेताः॥२७

प्रकर्षेणाप्य त्वद्दंगसाम्यत्वकथनाय पश्चद्देहं दहने चिक्षेप॥ न तु तद्वर्णं प्राप्नदिति भावः॥ हीरकमणितुल्यवीजपूर्णम
पि दाडिमस्य फलं तव दंतपंक्तिं विलोक्य तूर्णमेव विदीर्णं स्फुटितं जातं॥ तदुपमानवहिः स्तनत्वादिति भावः॥२६॥ हे
कांते प्रिये पश्य मुखगौरवं प्रत्यक्षमवलोकयति॥ धाता उर्व्यां भूमौ स्थितं तव वदनम्॥ वाद्धौ क्षीरसमुद्रे स्थितं शीतरश्मिं
च गुणसाम्यातिरेकज्ञापनाय अनिल एव तुलादंडस्तेनातुलयत् तोलयामास॥ तदेंदुः लघुत्वादल्पगुणाश्रितत्वात्खे
चरः उन्नतो भूत्॥ तदा अस्य चंद्रस्य पूर्त्यै धाता ताराः अश्विन्याद्याः क्षिपति स्म॥ तस्य चंद्रस्य पूर्त्यै एताः ताराः किं क्षिपत्यः
न किं यत्यर्थ इत्यर्थः॥ गुणगौरवत्वात्तव वदनमत्रैव स्थितं चंद्रस्तु गुणाभावादूर्ध्वं मिति भावः॥२७॥

ननुसिताखंडश्चेदल्पतरः गुडोबहुतरः तर्हि किंगौरवादेवगुणाधिक्यमित्यपेक्षायामाह॥ भावपित्तानिषेव्यधात्र्यागु
रुकृतमपिमेवदनंतथापिप्रियेणत्वया ऽऽस्वाद्यामृतरश्मेरपिमंडलंनिर्णीयतां॥ यत्रैवस्वादातिशयस्तत्रैवगौरव

तथावुभुजेयथाकापाम्बरापभूत्वानाद्यभुनक्तिनपुनरावुभुजेनाग्रभोक्ष्यतीति॥२७॥ अथतद्वसवणनमुपस
हरतिप्रियायाःकाप्यनिर्वाचनीयाद्विव्यालोकिकीस्तनश्रीःराघवस्यहृदयतापं॥हत्॥ अयतीतिहृदयः॥कामः

जानकीसानंदंसोत्कंठंचप्राणवल्लभमाल्हादयति॥ रमणचरणयुग्मंतावकेभावपित्तामधुरगिर
मुदारांरामहासीत्त्रवीमि॥ कृतमपिगुरुधात्र्यास्वादनिर्णीयतांमेवदनममृतरश्मेर्मंडलंवाप्रियेण
॥२८॥ रामःसानंदं॥ सीतांमनोहरतरांगिरमुद्गिरंतीमालिंग्यतत्रवुभुजेपरिपूर्णकामः॥ रामस्तथा
त्रिभुवनेपियथानकोपिरामीभुनक्तिवुभुजेनचभोक्ष्यतीशः॥२९॥ मृदुसुरभिसुवर्णस्फीतकक्षापु
टोद्यल्लभुजलतायाःसंपुरालिंगितायाः॥ सुरतरसवशायाराघवस्यप्रियायाहरतिहृदयतापंकापि

ततापंकामव्ययाहरति॥ कीदृश्याः मृदुःसंस्पर्शःसहःसुरभिःसुगंधःसुवर्णःगौरोज्वलः॥ स्फीतःकिंचिदुन्नतः
सचासौकक्षापुटश्चतस्मादुद्यतेललितेभुजलतेयस्याःसातथाकक्षापरोद्यदितिपाठसएवार्थः॥ एवंभूतेन
कक्षापटेनउद्यतेउपरिवेष्टितमूलेभुजलतेयस्याःहरतुइतिवापाठः॥ तत्राशीः॥ पुनःकीदृश्याःपार्श्वस्थितायाः
परिरभ्यदेहं॥ पूनः॥ स्त्रियोलोलनकोरतस्तैःरसुन्दवःसंपुटनामधेयः॥ अयमेवोदयनेनान्ययोक्तः॥ उत्तान
सुतप्रयोल्ललितेभुजेलतायाःसंपुरोलिंगितायाः॥ मरोपरिस्थःकस्वासमावर्ज्यनदूरुयुग्मे॥ संमर्दयापाणस्त
नमंडलेयत्रमेतसस्याकिलसंपुराख्यः॥३०॥

रंगभवनेसुरतागारेचिरंकोपिश्रमआविरासीत्॥कयोःस्तयोःसीतारामयोः॥श्रमेपिचिरमप्ययमितिचरकः॥किंक्
त्वेवआमामीभविष्यायोदीर्घविरहःदंडकारण्यप्रस्थानरूपस्तंज्ञात्वेवकीदृशीसीता॥अद्भुताःकामकेल्पायस्याः
सा॥अस्यरसस्यारोतुरंगा[illegible]
निश्चमेवज्ञात॥यद्वास्यषएवार्थः॥रंगभवनेनुतकामकेलिःकामक्रीडाचिरमाविरासीदन्यत्पूर्ववत्॥अन्य
केविनैवव्याख्यातं॥श्रममेवाविःकरेभिचरणायुधानामिति॥तयोर्जानकीरामचंद्रयोर्मध्येजानकीच

आगामिदीर्घविरहंचिरमाविरासीत्ज्ञात्वेवरंगभवनेन्द्रुतकामके
लिः॥श्रुत्वातयोर्गिरमपूपुजदेतुपत्नीमुद्गीर्णकर्णभरणाचरणा
युधानां॥३१॥इतिश्रीहनुमन्नाटकेजानकीरामचंद्रविलासोनाम
द्वितीयोंकः॥२॥

रणायुधानांगिरंश्रुत्वाविडालपत्नीमपूपुजत्॥अत्रपत्नीशब्दोविडालपूजनेपतिव्रतायाःपरपुरुषस्य
शंकामाभूदितिसूचयति॥किमित्यपूपुजत्॥एवमुक्तंभवति॥वाल्लायाम्भेतसिचरणायुधशब्देनैवप्रा
तरुत्पद्यतेनेनतस्था॥अतःपूजिताविडालपत्नीपूर्ववैरमनुस्मरंतीचरणायुधमव्यग्रमस्मातुतस्मि
न्निरतेप्रातःकालासंभवाद्दनंनामवतुयामिनीकामिनीपतिमालिंग्याजरंप्रेमसुखमनुभवत्वित्यभि
प्रेतोर्थः॥३१॥इतिश्रीमिश्रमोहनदासविरचितायांहनुमन्नाटकदीपिकायांजानकीविलासःद्वितीयोंकः॥२॥

32

अथ रामस्य वनलीलां वर्णयितुमंकमारभते॥ राघवो रामः धर्मपत्न्या सार्द्धं कतिपयसमयं कतिचित्समयं यथास्या
तथा सुरंगान् भोगान् कामविलासान् अष्टौ भोगान् वा भुक्त्वा श्रवणमुनिपितुः यज्ञदत्ताख्य वैश्यतपस्विनः शापस
मयं प्राप॥ अत्रेयं कथा॥ मृगयागतो दशरथः वन्यगजभ्रमेण शब्दवेधित्वपरिचपायकुंभं जलेन पूरयंतं श्रवणमु
निमदृष्ट्वैव जघान॥ ततोस्य पित्रा यज्ञदत्तेन शप्तः अस्यामेवावस्थायां पुत्रशोकात्परलोकं गमिष्यसीति॥ तं वियो
गसमयं प्राप॥ यद्वा राघवो दशरथः धर्मपत्न्या कौशल्या सार्द्धं वर्द्धिष्णुकामः अपूर्णकामाभिलाष इत्युभयो

भुक्त्वा भोगान्सुरंगान्कतिपयसमयं राघवो धर्मपत्न्या सार्द्धं वर्द्धिष्णुकामः श्रवणमुनिपि
तुः प्राप हा शापकालं॥ धनेतस्मिन् विवस्वान्मलिनकिरणतां हा महोत्पातहेतोरुल्कादंडप्र
पततिनभसः कंपते भूतधात्री॥१॥ दिग्भागो धूसरो भूदहनि बहुतरस्फारतारास्फुरंतिस्व
र्भानोर्भानवीय ग्रहणमसमये रोधिरी विंदुवृष्टिः॥ मध्याह्नेर्द्दास्य खगगणरुतमतिस्फीत
केतुप्रचारो वारंवारं गंभीरप्रलय इव महाकालचीत्कारघोरः॥२॥ ॥ ॥ ॥

विशेषणं॥ भोगानष्टौ॥ उक्तंच॥ सुगंधं वनिता वस्त्रं गीतं तांबूलभोजनं॥ वाहनं भूषणं चेति भोगाष्टकमुदीरितं॥ शा
पकालमेव द्योतयति॥ तस्मिन् समये धत्ते व्यधत्त॥ भूतार्थे वर्त्तमाननानारकालेकृतित्वात्॥ उक्तं च दशरूपके॥ प्राकृते
वर्त्तमानत्वं नानारकालकृतिः परेति॥ अहनि दिवेवस्फारो विस्तारः स्वर्भानो राहोः सकाशात्॥ मध्याह्ने ईमास्यकोशाय्येषां ते
खगगणाः तेषां रुतमभवत्॥ स्फीतो वहुतरः केतूनां शिवानां प्रचार इतस्ततः सरणं वारंवारमभवत् रुक् इव समयः गं
भीरप्रलय इव॥ कीदृशः प्रलयः महाकालो रुद्रस्तस्य चीत्कारेण घोरः प्रलये रुद्रश्चीत्कारकरो भीतिप्रसिद्धं॥ स्फीतकेतु
प्रचार इति वा पाठः॥ स्पष्टार्थः॥ एकोत्तरशतं केतवः सेति॥२॥

दशास्यंदनं दशरथे कंदयंती शिवशिवेतिखेदं एत्य रामः शांत्यै उत्पातजन्यदोषोपशमाय वनमभिप्रेष्यतां॥ पुत्रस्य म
म सुतस्य भरतस्य राज्यं भवत्विति वाचमूचे॥ अथवा प्राणधारणाक्षमत्वेतान्प्राणानपि विहाय अनंतं प्र॥ ति निर्मुक्तः
स्यां तत्समेव वचनं अन्यथा मा भूत्॥ [illegible]
ष॥ अत्र राज्ञा तेचितितं चतकं कप्युक्तकरा। मितद्धिरा मादृशा न मरणमाप्नुयान्न चेदनृतः स्यां तत्यंन्तंतमास्यान्म
रणमेवा रित्वितिभावः॥ अत्रेयंकथा। देवासुरयुद्धे देवपक्षस्थो राजामूर्छितः तेनसहैव तत्र गता कैकेयी राजावे

कैकेयी आत्मगतं। प्राप्तः किलमद्भाग्यबंधकालः तर्हि द्रुतं राजानं प्रति भरतराज्यं प्रार्थयामि। नख
लुकालक्षेपः श्रेयसे॥ उपगम्या प्रकाशं॥ राजन्नमंगलं यंवधूः॥ यतोस्या आगमनमात्रेण महोत्पा
ताः संभवंतीमिति॥ अप्रकाशं रहसि। तानुत्पातानवदृश्यक्षितिपमथ दशास्यं दनं कं दयंती लोकानूशो
कानलोच्चैः शिवतरसा भस्मसात्कुर्वतीव। कैकेयीवाचमूचे निखिलनिजकुलांगारमूर्तिः सुसी
तः शांत्यै पुमस्य राज्यं भवतु वनमभिप्रेष्यतामेषरामः॥३॥

नंभक्ष्यन्योरा। क्षसेभ्यो योगबलेनारक्षत्। तदा प्रबुद्धेन राज्ञा वरद्वयमस्यादत्तं तनया राज्ञे विन्यस्तं यथेच्छं ग्र
हीष्यामीति तद्वरद्वयं नादत्तं तत्वमितिप्रसिद्धं॥ अप्रकाशं रहसि। दशरथः सकरुणं स्त्रीवचनस्वीकरणं मरणो
त्साहं च नारयन्महतीं मूर्छामासाद्य धरणीतलमुपगतः॥ ततः कथमपि चेतनामुपलभ्य॥ रामं कामाग्रजमि
व वनं प्रस्थितं वीक्ष्य शक्ष्ये धर्तुं प्राणान्नृशि॥ वशिवकथं तान्विहायाथवाहं। निर्मुक्तः स्यां वचनमनृतं तत्पुनर्मा
न्यथामेभूयान्नृपस्तद्नुवचनं हा वभाषेतथेति॥३॥

39

अत्रप्रसिद्धार्थकथनेनरामायणविरोधःस्यात्॥ अस्याप्यग्रिमश्लोकेऽन्वयः। ततएवंव्याख्यायते अत्रराज्ञोकंराज्या
हूतेरामोवनंयातु अराज्यार्हो भरतोराज्यंगृह्णातुतद्द भरतोपिराज्यंपरित्यज्यरामानुगमनाय। ततोभूदितिनिःख्या
ग्यते अन्यथाभरतेऽधर्मस्स्यात् रामभरतौराज्ञानंनमस्कर्तुमवतरतइत्यन्वयः। कीदृशौ। स्वस्वशमयवनगमनरा
ज्यग्रहणरूपंअधिगम्यहर्षशोकौवनगमनाद्रामोहर्षंराज्यश्रवणाद्भरतःशोकंनाट्यंतौ॥ नटनमेवाह। गुरोर्दश
रथस्यगिराजराश्ववल्कलानिचतान्येवछत्रचामराणितद्धारिणौकस्मैवनप्रस्थानमेवराज्याभिषेकः तस्मैएत

रामभरतौ॥ स्वस्वकालमधिगम्यहर्षशोकौनाट्यंतौ। गुरोर्गिराजरावल्कलछत्रचामरधारि
णौवनप्रस्थानराज्याभिषेकार्थायराज्ञानंदशरथंनमस्कर्तुमवतरतः॥४॥ तत्रभरतःहार्त्तत
मातविरहज्वलितानलोमीकामंदहत्वशानिशैलक्षपाणवाणाः॥ मश्चतुना। न्विषहतेभरतःस
लीलंहारामचंद्रपदयोर्भंपुनर्वियोगं॥४॥ श्रीरामः॥ माबाधतेनहितथागहनेषुवासोराज्याक
चिरंजनकबांधववत्सलस्य॥ रामानुजस्यभरतस्यतथाप्रियायाःयादारविंदगमनक्षितिकृत्यलाध्या॥५

हर्थेननृपसत्यत्वमायातिभरतेपिधार्मिकत्वंनृपेणरामेभरतेपिराज्यंप्रतिज्ञाते॥ एकतराद्दानेनृतमेवतस्माद्
भाभ्यांवनमेवराज्यमतोभरतोपिजराधरःसन्रामाज्ञयाराज्यंचकारेतिकेकेय्याअपिवरदानात्सत्यत्वमेव॥ अ
शनिर्वज्रंशैलागिरयःकृपाणखड्गबाणाःशरास्तेचतेतान्वज्रादीन्॥४॥ भरतस्यराज्यारूढिश्चराज्याकरणं
कीदृशस्यभरतस्याजनकेदशरथेबांधवेमयिवत्सलस्यप्रेमवतःयद्वाजनकोविदेहःतद्बांधवस्यतद्भ्रातुःप्रेष
स्यजामातृत्वात्ममानुजस्येति॥ अन्यत्सुगमं॥५॥

नृपेण दशरथेन सुमित्रामंत्रीतद्वचनेन सुतानां राम भरत लक्ष्मणानां हा राघव राम इति एकवारमुच्चरितस न्तिदीर्घ
तरं निश्वस्य भूयो नोच्छ्वसितं हे हंत्यक्तमिति भावः ॥ उक्तिप्रयुक्त्या त्राथोद्धारनं सुगमं ॥ शरयुक्तश्वायह स्तेयस्य मध्य
पदलोपी समासः ॥ अन्वर्थे ऽ थ सबद्धः लक्ष्मणास्तं राघवमनुजगाम ॥ वाल वत्सो गामिवेति ॥ ॥ भरतो महतीम्
ऊर्मीमासाद्य वेल्कव्यं नाटयति ॥ ॥ गुरोर्दशरथस्य अहमपियास्यामीति ॥ कोशलकन्यका कौशल्या तदं श्रिपु

लक्ष्मणत्वमपियाहि मं हि रंजानकी तु विधिनैव या पिता । दुःकृती नयतु वा न्यद्गतिर्निरामम एष पूरुषायु
धश्चिरं ॥ ६ ॥ राज्ञा शोकानलज्वालाव्याकुलीकृतचेतसा ॥ ७ ॥ श्रुत्वा सुमित्रवचनेन सुतप्रयाणमशापस्य
तस्य च विचिंत्य विपाकवेलां ॥ हा राघवेति सकृदुच्चरितं नृपेण निश्वस्य दीर्घतरमुच्छ्वसितं न भूयः ॥ ८ ॥
मातस्त्वातः क्वयातः सुरपतिभवनं हा कुतः पुत्रशोकात् कोसौ पुत्रश्चतुर्णां त्वमवरज तया यस्य जातः किं
मस्य ॥ प्राप्तोसौ काननांतं किमिति नृपगिरा किं तथासौ वभाष मद्वाग्बधः फलं ते किमिह तव धराधीश
ताहाहतोस्मि ॥ ९ ॥ अत्र कौशल्या ॥ लोचनस्य शरयूरविदूरे गोहमेव वनमसाक्षिहीनी च ॥ शृंगवेरमपि स
त्युरगारं कुत्र वत्स्यति परेह निरामः ॥ १० ॥ त्रैलोक्यमंगलमिदं परित्यज्य वत्स हंत त्वयं दशरथस्य गृहे गतो
सि । तत्रापि केकेयमहेंदु सुतां विहाय पापीयसी कथमिमां जननीमकार्षीः ॥ ११ ॥ अयि जानकि पुत्रि
शैशवे प्रतिपन्नासि वधूजनेक्रियां ॥ अथ गच्छसि यौवने वनं परिणामे भविता सिकीदृशी ॥ १२ ॥ ॥

गलं शुकं च सारिकां च पिककुलं च हंहै क्व ॥ इति पुनर्मूर्छितो भुवि पपातेत्याह ॥ अयोध्या निकट एव नंदिग्रामोस्ति तत्रस्थः
सन् मम जटाजिनाहितः किमयोध्यापालनेनेति तत्राह रघुपतेः रामस्य वनवासानंतरभोगाय अपालनेरामवचनभं
गात् ॥ त्वमत्रस्थो राज्यं कुर्विति रामवचनं ॥ १२ ॥

१७

36

सुघइति॥त्रिचतुरेतिनिपातः॥असकृद्वारंवारं पर्यंतभूः परिसरइत्यमरः॥१३॥आहावेतिइतिहेवैदेहिइमान्वनसंबंधिनोभूभागान्भूप्रदेशान्त्वंकथयायाःकथंगमिष्यसि।कीदृशान्भ्रातांसिवकाननात्रिचगतांश्चनिर्दराश्च

यामिनीतिमिरगर्भविलीनाचंद्रनिग्रहकरीजलधारांशाखिमूलनदकूलशयानःकिंकरोतिविपिनेममरामः॥१३॥रामः गुरोर्गिराराज्यमपास्यतूर्णंवनंजगामाथरघुप्रवीरः।निषंगपृष्ठःशरचापहस्तस्तंलक्ष्मणोगामिववालवत्सः॥१४॥सीता।गुर्वाज्ञापरिपालनायचवनंसंप्रास्थितंराघवंदृष्ट्वासौत्वरिताविदेहतनयाश्वश्रूजनंपृच्छति॥नत्वाकोशलकन्यकांघ्रियुगलंपश्चात्सुमित्रांपुनःपृष्ट्वाहाशुकसारिकापिककुलंरामानुगाप्रस्थिता॥१५॥रामेप्राप्तेवनांतेकथमपिभरतश्चेतनांप्राप्यतातेनीत्वाऽस्वेंद्रलोकंमुनिजनवचनाद्दूर्ध्वदेहक्रियाभिः।भ्रातुःशोकाज्जटावानजिनरततनुःपालयामासनंदिग्रामेतिष्ठन्नयोध्यांरघुपतिपुनरागामिभोगायवीरः॥१६॥सद्यःपुरीसरेषुसिरीषमृद्वीगत्वाजवात्रिचतुराणिपदानिसीता।गंतव्यमस्तिकियदित्यसकृद्ब्रुवाणारामाश्रुणःकृतवतीप्रथमावतारं॥१७॥रामः॥आहावेवकृशोदरीकुचतरीभारेणनम्रापुनर्लीलाचंक्रमणंचनैवसहसेदोलाविधौश्राम्यसि।भ्रातःकाननगर्तनिर्झरसरित्प्रायाननूपूर्वानिमान्भूभागानपिभूतभैरवमृगान्वैदेहियायाःकथं॥१८

सरितश्चएषांप्रायोवाहुल्यंयेषुतान्अपूर्वान्त्वयाकदाप्यदृष्टान्॥यास्यामीतिचेतत्रहेतुमाह।लीलायैयन्मंदिरेपिचंक्रमणमितस्ततःसरणतदपित्वनसहसेहिंदोलांदोलनविधौअपिश्राम्यसिश्रममेषि॥१९॥

म१ रामोवारितोपिकृतप्रयाणांसीतांदृष्ट्वा धरणीं प्रार्थयते। भोः वनिभूमे इयं सीता। कस्मात् स्खलति यथा स्यात्तथा। कठिनात्तनुर्यस्या एवंभूताया धरण्याः सकाशात्। स्खलतीसतीयातिकुतइत्यपेक्षायामाह॥ अरुणदला चेयं नलिनी च तद्वदासमंततः स्निग्धेण दारविंदेयस्याः साम्प्रतोस्याः पादविन्यासप्रदेशे निजकठिनत्वंत्यज। कस्मात्यजामीति चेत् त्राहेतवसुताएतवात्सल्यमुद्दीपितं॥ जानकी वनेयातिपद्माकीदृश्याः धरण्याः अरुणायेदलाः पादांगुलयः तेषां नलिनीदुःखेदत्यर्थः। नलोरवीनालः ... तिचरकः नलः दुःखमत्यास्ती तिनलिनी॥१७॥ पथिकवधूभिः पांथस्त्रीभिः पथिपथि मार्गेमार्गेकवधूभिः ग्रामीनस्त्रीभिः

रामः॥ अरुणदलनलिन्यास्निग्धपादारविंदा कठिनतनुधरण्यायात्यकस्मात्स्खलंती।
अवनितवसुतेयं पादविन्यासदेशेत्यजनिजकठिनत्वं यानकीयात्यरण्यं॥१७॥ मैथिली।
पथिपथिकवधूभिः सादरंपृच्छमानाकुवलयदलनीलःकोयमार्यतवेति। स्मितविकसि
तगंडव्रीडविभ्रांतनेत्रंमुखमवनमयंतीस्पष्टसीता॥२०॥ घुसृणमसृणपादागम्यतेभूः
सदर्भा विरचयशिवजातं मूर्ध्नि घर्मः कठोरः॥ इति हृजनकपुत्रीलोचनैरश्रुगर्भैः पथिपथि
कवधूभिर्वीक्षिताशिक्षिताच॥२१॥

कोस्त्रीग्राम्यप्रकाशायेरितिधनंजयः स्मितेन विकसितौ यगंडौयस्मिन् व्रीडया विभ्रांते नेत्रेयस्मिंस्तन्मुखं अवनमयंती। एतेनैव स्पष्टं ममरमणायमित्युक्तवतीनतु गिरेति॥२०॥ पथिमार्गेपथिकवधूभिरश्रुगर्भैलोचनैः कृत्वाजानकी। वीक्षिताइतिशिक्षिताच। इतिकिं भोसीते त्वं घुसृणमसृणपादा कमलकोशनवनीततुल्यारुणकोमलचरणासि भूः सदर्भादर्भांकुरसहिताभवत्यागम्यते मूर्ध्निकठोरोघर्मस्त्वमतःशिवजातं शिरः पादत्राणंविरचयेति। घुसृणः पांकजो मर्भोमसृणनवनीतकम्रितिधरणिः। शिवजातशिरः पादत्राणवल्कलपत्रजमितिशब्दशासने॥२१॥ ॥ ॥ ॥ ॥

पयः प्रश्रयेर्निर्जरतरूपेरेषशैलेंद्रश्चित्रकूटोऽपि साश्रुरभूत् ॥ केनयेनतु दिते नकीदृशः उद्विग्नायेविहंगाः पक्षिणस्तैर्निर्गताःप
रित्यक्तास्तरवो यस्मिन्सः निःसमदाः हर्षरहिताः श्वापदाः मृगादयोयस्मिन्सः ॥ प्रमोदामोदसंमदाइत्यमरः ॥२२॥ यथासुख
मितिरामस्ययथासुखं स्यात्तथैवगच्छानुसरेत्यर्थः ॥२३॥ विशीर्णाः सर्वतः प्रक्षिप्ताः ग्रावाणोयस्मिन्सचासौ विंध्याद्रिपाद
श्चतस्मिन्नृत्वयिरेचरतिसतिकतिकरितायसाः दारवंतोभविताइति ॥ एतत्कुतइत्यपेक्षायामाह यद्यतो गोतमःशापाच्छिला
रूपामहिल्यां तवपदकमलरजोभिर्मुक्तस्त्यक्तः पाषाणदेहोयया तामलभत ॥ एवमुक्तं भवति ॥ त्वच्चरणरेणुस्पर्शेनयथा
पूर्वमहिल्यापाषाणरूपापि देवी त्वंगतातथाद्यापि विंध्यग्रावाणः स्त्रियो भविष्यतीति पूर्ववृत्तमनुस्मृत्योक्त ॥२४॥ वनेज
लेभूमौ ॥२५॥ चेदर्थवाशब्दः ॥ इयमपि पोतपा। श्रीनौकाचेत्केनापि शापिता कापिमुनिपत्नीस्यात् तर्हि नोरकस्मात् कमेवश्रीम

तत्रचित्रकूटेजानकी सकरुणंसबाष्पंच ॥ मूर्द्धावध्रुजटेनवल्कलभृता देहेनपादानतिं कुर्वाणेभर
तेतथाप्ररुदितंतारस्वरैः सीतया ॥ येनोद्विग्नविहंगनिर्गततरुर्निः संमदश्वापदः शैलेंद्रोऽपि किलैष
भूरिभिरभूत्साश्रुः पयः प्रश्रयैः ॥२२॥ तत्रैवसुमित्रालक्ष्मणंप्रति ॥ रामदृशरथंविद्धिमां विद्धिजनका
त्मजां ॥ अयोध्यामटवीं विद्धि गच्छपुत्रयथासुखं ॥२३॥ अथभरतेनिवृत्तेरामेप्यन्यतः कृतप्रयाणे ॥
आहस्मजानकीरामंप्रतिपदकमलरः ॥ जोभिर्मुक्तपाषाणदेहामलभतयदहिल्यांगोतमोधर्मपत्नीं ॥
त्वयिचरतिविशीर्णग्रावविंध्याद्रिपादेकतिभवितारस्तापसदारवंतः ॥२४॥ इतिपूर्ववृत्त वैदेही ॥
अदृष्टराजमंदिरबहिर्व्यवहारतयाबालभावाच्चदैवयोगात्तनौकारोहणसुखमनुभूयवनेचरंतीस्थ
लेपिभाराक्रांतासती ॥ नोः प्रचरतीतिमन्यमानास्माभिरतः परमनयैवसुखप्रयाणंकर्तव्यंनतुप
द्भ्यामितिबुद्ध्यानावमधिकृत्यराममब्रवीत् ॥२५॥ उपलतनुरहिल्यागोतमस्येवशापादियमपि
मुनिपत्नीशापिताकापिवास्यात् ॥ चरणनलिनसंगानुग्रहंतेभजंतीभवतुचिरमियं नः श्रीमतीपोत
पात्री ॥२६॥ रामः ॥ दृष्टातिदैन्यजनकात्मजायास्तत्रैवरामः सहलक्ष्मणेन । गोदावरीतीरसमाश्रिते

वनेषु चक्रे निजपर्णशालां ॥२७॥

तीभवतुसुखकारिणीस्यात्तमुनिपत्नीमभूदितिभावः ॥ केवगोतमशापादुपलतनुः पाषाणदेहापितेचरणसंगानुग्रहं
भजंतीसतीअहिल्येवयथाशिलाहिल्यात्वयानीतातथेयंनौकापिमुनिस्त्रीत्वमायातु ॥ अस्मदारोहणसुखाभावात् इत्युक्तव
त्यां सीतायांरामः ॥२६॥ वनेषुदंडकसत्त्वेषु ॥२७॥

हेरघूत्तमएषापंचवटीकुटीभवत्विति विशेषः कीदृशीपंचवटीपंचवटीरक्षयुक्ता॥ एतेननिविडछायत्वमुक्तं॥ पुनः कीदृशीयत्रयस्यां
पंचवटीअस्तिपंचानांवटानांसमाहारः पंचवटीपंचवटवृक्षमूलेषुपंचसरस्वती॥ गर्भावटोभुविस्त्रश्रेइत्यमरः॥ पुनः कीदृशी
पांथस्यप्रवासिनः एकमपेक्षितंजलछायादिकंघटयतेइतीपयतीति पुनः कीदृशीपुरस्कृतो [illegible]
[illegible]
यत्रयत्समीपेगोदागोदावरीनदीनर्त्तकीरूपाकीदृशीगोदातरंगितानटोयस्याःसापुनः कीदृशी कल्लोलचंचत्तुटी[illegible]
लैश्चलेनः पुराजलनिर्गमायस्यासा। पुनः कीदृशीगोदाअलौकिकोपःपद्मामोदःतस्यकुटीकूपिकापुनः कीदृशीगोदा
कुटीवभवाब्धिशंकरीभवाब्धेः शंकरीपोतरूपापुनः कीदृशीगोदातटीवभूतक्रियादुःकरीभूतानांक्रियाभिस्सामान्य
धर्मैःदुःप्रापावहुरापलभेत्यर्थः॥ अत्रविशेषणेपुनरीनदीकुटीसादृश्यंचिंत्यंविस्तारभियानविरतं॥ अत्रपद्येशब्दवलादन्यो

लक्ष्मणात्तत्कुटीरमणीयतामालोक्य एषापंचवटी रघुत्तमकुटीयत्रास्तिपंचावटीपांथस्यैकघटीपुरस्कृततटीसल्के
शमितोवटी॥ गोदापद्मनदीतरंगिततटीकल्लोलचंचत्तुटीदिव्यामोदकुटीभवाब्धिशंकरीभूतक्रियादुःकरी॥२८॥

प्यर्थः संभवति हेरघूत्तमएषाकुटीभवतु। कीदृशीपंचानांपृथिव्यप्तेजोवाय्वाकाशानांवटीनिहंत्रीवदृचशातने। यांप्राप्य
नपुनर्भवइति यत्रयस्यापंचानांरूपरसस्पर्शगंधशब्दानामावटीसमंतान्निवर्त्तकोविधिरस्ति॥ वटवर्ज्जने॥ अथेंद्रिया
णिसुजपानीतिपांथस्यमोक्षायकृतप्रयाणस्यएकानिरुपमाघटीविश्रामस्थानं॥ घटभूविश्रमणेयत्रयस्यांगोदाःगावोवेद
वाचस्ताददातीतिगोदामुनिसभानदीप्रसिद्धा॥ नराविभावि॥ पुनः कीदृशीगोदापुरस्कृतातटीसमितुकुशसमरद्धिर्यासा॥
तटचसमृद्धो॥ पुनः कीदृशीदारापत्याभिनिवेशस्तंस्यमितोसंचेयवटीवज्रकृपा॥ वज्रंवटीपविःसारइतिशाश्वतः॥ पुनः कीदृ
शीतरंगितारागादितरंगेषुप्रासायेजीवास्तेषांतटीनिःसारणतीर्थवती। पुनः कीदृशीकल्लोलेहर्षैरितस्ततश्चक्रम्यमा
णाः॥ पुरानिकुंजायस्याःसाकल्लोलहर्षवारिणारितिधरणिः निकुंजयुटइतिविश्वः॥ पुनः कीदृशीदिव्योनैसर्गोयआमो
दःवासनातस्याःकुटीक्षयकर्त्री॥ निवासस्यपुंयोःकुटीतिचरकः॥ अतएवभवाब्धिशंकरीससारसागरोतारनौका॥ नन्वेवंचे
त्सैवंकथनविश्रुरितिचेतत्राह॥ भूतानांप्राणिनांक्रियाभिदुर्दिष्टेदुःकरीदुःप्रापेत्यर्थः॥ एतेधातवःकविकल्पद्रुमेवित्यात्तद्रूपंच॥

२१

40

तन्निवकुरीकरणाज्ज्ञातनिद्रांप्रणमति॥ अहंरामंवंदेइत्यन्वयः॥ कीदृशंक्रीडानांनरसुरतिर्यगाद्यवताराणांकल्प
वरं॥ अवताराः यतःशक्तिमास्थायक्रीडंतियथेष्टं॥ ननुप्रतिप्रतियुगमवतरेणजीवः किंनेत्याह॥ विसर्पितवरंप्रकटी
कृतविश्वतनुं॥ ननुविश्वजनकत्वेनतत्कृतदोषवान्किंनेत्याह॥ विश्वांबुजन्मावरं॥ विश्वमेवांबुजंन्मकर्मतंतन्प्रका
शनायआसमंततः सूर्यं॥ यथासूर्यःपद्मंबोधयतिननु[illegible]॥ [illegible]ननुतद्दो
षभाक्॥ वरः सूर्येतरोलोकेइतिशाश्वतः॥ सूर्यवन्नाशवान्किंनेत्याह॥ पिष्टांडौघघाटंचूर्णीकृतब्रह्मां
डसमूहं॥ स्वयमेवनाशकृदित्यर्थः॥ तर्हिसर्वानेवनाशयतिनेत्याह॥ धृतांह्रिशकटं धृतौहृदयेस्वांह्रीयैस्तेधृतां
ह्रयः भक्तास्तेषांसंसारोत्तारणायशकटंवात्यंपोतमिति॥ एतदेवदर्शयति॥ ध्वस्तंदूरीकृतंक्षमायुक्तानामंबरीषा

जानकीसंन्यस्ताध्वपरिश्रमामुख्यावतारंपुराणपुरुषंवंदेतस्म॥ क्रीडाकल्पवरंविसर्पितवरंविश्वांबुजन्मावरंपि
ष्टांडौघघटंधृतांह्रिशकटंध्वस्तक्षमासंकटं॥ विघुष्याकरुचाविधूतकपटंसीताधरालंपटंभिन्नारिभघटंविरूढ
शकटंवंदेगिरांदुर्घटं॥२७॥

दीनांसंकटंयेनतंमध्यमलोपीसमासः॥ तर्हिभक्तपालकत्वाद्विषमः किंनेत्याह विघुष्टिवयाचार्वीरुरुत्वांगदी
प्तिःतयाविधूतःकपटोमायाकृतनटंभोयेनतं॥ अतोयः कोपित्वद्रूपंस्मरतिदंभस्तितिर्नैतरेषां॥ अतोज्ञानज्ञाताभ्यां
जीवानामेवविषमत्वंनतुतवेतिभावः॥ नन्वेताद्रक्कथंप्राप्यतेतत्राह॥ सीताधरालंपटंभक्तार्थमाविर्भूतमित्यर्थः॥
ननुतर्हिकामीकिंनेत्याह॥ भिन्नाअरयःकामादयएवइभाः मतंगजास्तेषांघटाःसमूहाःयेनतं॥ ननुजितका
मादित्वात्सहतेहिकरिपुःकिंनेत्याह॥ विरूढशकुटविशेषणरूपाःखंडीकृताःशकटादैत्यराजानोयेन॥ शकोयव
नराक्षसाविति धरणिः॥ टामहेश्वरे आख्यातइत्येकाक्षरी॥ नन्वेवंमांसर्वंकिंअविघुरितिचेन्न॥ गिरांदुर्घटंवाचामगो
चरंअनीर्वचनीयमित्यर्थः॥२७॥

त्वन्मायया हं सीतां हरामीत्याज्ञा॥ यद्यस्याज्ञां करोमि तर्हि रामान्मर्तव्यं अकरणे रावणादेव॥ अतउभयोः सकाशा
न्मर्तव्यमेव तर्हि रामहस्तान्मरणं वरं न रामान्मरणे मोक्षः स्यादिह च स्वामिकार्यमित्यर्थद्वयमिति इति विचार्य स्वर्ण
वर्णमृगो भूत्वा तत्पार्श्वमागत्य ... गतः॥ ३०॥ सीतया सह लक्ष्मणेन सह जानकीकनकमयकुरंगं ददर्श॥ कीदृशं द
शकंठस्य उत्कंठितेनोत्कंठया सीताहरणाभिलाषेण प्रेरितं प्रस्थापितमिति॥ २१॥ जानकीकनकमयमृगं ददर्श मृगम्

अथ मारीच अतीतानागतवर्तमानं दर्शनो लंकापतेराज्ञामासाद्य चिंतयामास॥ रामादपि च मर्तव्यं म
र्तव्यं रावणादपि। उभयोर्यदि मर्तव्यं वरं रामो न रावणः॥ २०॥ वनांतरे जानकी॥ सुललितफलमूले मैथ्रे
कालेकियंतं दशरथकुलदीपसीतया लक्ष्मणेन। गमयति दशकंठोत्कंठितप्रेरितं द्राक् कनकमयकुरंगं जा
नकी संददर्श॥ २१॥ सा तं मायाकुरंगं द्रुतनिधननिशाचारि मारीचमग्रे धावंतं संचरंतं क्षणमतिगहने
जानकी याचते स्म॥ रामं कामाभिरामं निशितशरधनुर्धारिणा लक्ष्मणेन क्षिप्रं तद्रक्षणायोल्लिखिततत
टभुवा सोप्यगात्तद्वधाय॥ २२॥ इति श्रीहनुमन्नाटके तृतीयोंकः॥ ३॥ ॥ ॥ ॥ ॥ ॥

तिरामं याचते स्म प्रार्थयामासेत्यर्थः॥ कीदृशं द्रुतं शीघ्रं मृत्युर्यस्य द्रुतनिधनश्चासौ निशाचारी च स चासौ मारीचश्च तं अग्रे धावं
तं अतिगहने क्षणं यथा स्यात्तथा संचरंतं सोपि रामः लक्ष्मणेन सह तद्वधाय क्षिप्रमगात् लक्ष्मणेनानुगत इत्यध्याहरोपा॥
कीदृशेन तद्रक्षणाय सीतारक्षणार्थं लिखिता धनुःकोट्या नरभूस्तटोद्धारोपांतभागो यस्याः सा भूः कुटी येन मद्धनुर्ले
खां कोपि नाक्रमिष्यतीति॥ २२॥ इति श्रीमोहनदासविरचितायां हनुमन्नाटकदीपिकायां तृतीयोंकः॥ ३॥ ॥ ॥ ॥

अथ तद्वधपूर्वकं सीताहरणं वर्ण्यते॥ एककरेण सार्द्धं विशिखमांदोलयन्निति। मृगयते वनवीथिकासु॥१॥ लोकयति॥१॥
मायामृगः प्रांतेषु प्रचलति प्रांतेषु शाल्मल्याभ्यासेषु मायापूर्वकं तत्मृगजात्यनुकरणमाह। कहाविदिति पदध्याहारः। सर्वत्रा
नुबध्यते। हस्ताभ्यासं हस्तग्रासत्वं लेढि लिह आस्वादने। नस्पृश्यता अस्पृश्यत्वं सुगमं॥२॥ ग्रीवाभंगेनाभिरामं यथा स्या
त्तथा मुहुरनुपतति पश्चाद्वलोकयति स्यंदनगमने बद्धा दृष्टिर्येन सः भूयसा पश्चार्द्धेन पश्चिमशरीरभागेन शरीयुः शरपात
भयात्पूर्वकायं प्रविष्टः पश्चात्संकुचितगात्र इति॥ अर्द्धावलीढैर्दर्भैः भक्षितैर्दर्भैः कीर्णं विक्षिप्तं वर्त्म येन सः कीदृशैर्दर्भैः। श्र
मेण विवृतमत्युद्घाटितं यन्मुखं तेन तेभ्रंशिथानुकैः एनं पश्य उदग्रप्लुतत्वात् उत्करोत्प्लवनात्। वियत्याकाशे चहुतरं प्रयाति

आंदोलयन्विशिखमेककरेण सार्द्धं कोदंडमपरेण करेण धुन्वन्। सन्नत्यपुष्पनतयापरलंजटानां रामो मृगं मृ
गयते वनवीथिकासु॥१॥ मृगः हस्ताभ्याससमुपैति लेढि वत्सृणं नस्पृश्यतां ग्रासवतां गुल्मान्प्राप्य निवर्तते किशलयाना
घ्रायपचा घ्रायच॥ भूयस्त्रस्यति प्रतिदिशं कंडयते स्वानतनु दूरं धावति तिष्ठति प्रचलति प्रांतेषु मायामृगः॥२॥ रामः॥ ल
क्ष्मणं मृगं दर्शयति॥ ग्रीवाभंगाभिराममनुमुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसापू
र्वकायं। दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति
॥३॥ ततो वनांतरे। बाणेन दिव्येन रघुप्रवीरस्ततो मृगं वक्षसि विद्धलक्ष्यः। विव्याध यावत्तरसा तपस्वी दशाननस्तावदि
हाजगाम॥ रावणः स्वगतं॥ मारीचमृगयाव्यग्रे रामे प्राप्तश्च रावणः। भयादिव कुरंगीणामस्याः पश्यामि लोचने॥५॥
सव्याहर धर्मिणि देहि भिक्षामलं घयल्लक्ष्मणपालसेलखां॥ जग्राह तां पाणितले क्षिपंतीमाकारयंतीं रघुराजपुत्रौ॥६॥
गच्छति भूमौ स्तोकमल्पं प्रयातीति॥३॥ यावद्रघुप्रवीरो बाणेन मृगं विव्याध तावद्वेषवत्पस्वीवेषधारी दशाननः इह सीतास
मीपे आजगामेत्यन्वयः॥४॥ रामे मारीचमृगयाव्यग्रे सति रावणो मृग्यत्र प्राप्तः सति॥ अस्याः सीतायाः लोचने भयात्कु
रंगीणामिव पश्यामि किं मय्यनिर्वचनीयभेयत्लोल्यं दृष्ट्वा न नेत्रे इति भावः॥५॥ स एव वणो व्याहरदित्युवाच किं तदाह। हे धर्मि
णि अतिथिदानादानपुण्यपराङ्मुखे भिक्षां देहि लक्ष्मणेन कृता या लक्ष्मणश्लिन्हस्य नेखा तामलंघयन्सन् तद्बहिः स्थ एव पा
णितले क्षिपंतीभिक्षां दृतीजग्राह॥ हृतवान्॥ कीदृशां रघुराजो दशरथस्तत्पुत्रौ रामलक्ष्मणौ आकारयंतीमाह्वयंतीं॥६॥

दशरथजटायू पूर्वं मित्रे तत्स्मरन् रावणमत्तात्वा कथयति रेरे इति नीचसंबोधने भो रो हा परहारचोर त्वया अधीरं तूर्णं यथा स्यात्तथा किं गम्यते धीरास्तु शनैर्गच्छंति न त्वया अरे तिष्ठ त्वं यमहं जटायुः प्राप्तोसि अधिष्ठितो धिवसित चंदनाचलयस्य तटे येन स सो ऽहं एतेन प्राप्तस्त्वमुक्ते एनां मुंचत्यजइयमेवप्रयाती तिचे न्नाकी दृशीं पतिर्देवदेवनायस्यास्ताचेन्नत्यजसित र्हि त्वं वीरस्य सकाशात् क्रुद्धाः मद्दीयं य ध्वं उतुं तुष्टं तद्देवांकुशस्तेन यत् क्रूरं अवस्करणं मुन्निद्रियाकर्षणं ततो य व्रणा स्तेभ्यो निः स्रुतं अस्त्रं युधिरं यास्यति ॥ यद्वा ॥ एकमेव पदं व्रणेभ्यो निःसृतं असृक् यस्मिंस्तत् दुरसः इति उरः ॥ यास्यति कर्मणि षष्ठीन स्तवं अस्त्रं युधिरं यास्यति ॥ यद्वा ॥ एकमेव पदं व्रणेभ्यो निःसृतं असृक् ॥

जटायुः ॥ दशरथमैत्रीमनुस्मरन् ॥ रेरे भोः परदारचोर किं मरे ऽधीरं त्वया गम्यते तिष्ठ ॥ धिष्ठितचंदना चलतटः प्राप्तो जटायुः स्वयं ॥ मुंचैनां पतिदेवतां न खलु चेन्मध्वंऽतुंगांकुशक्रूरावस्करणव्रणास्रगुरः पास्यति गृध्रास्तव ॥ ७ ॥ रावणं ज्ञात्वा ॥ जन्म ब्रह्मकुले हरार्चनविधौ कृत्वा शिरःकर्तनं शक्तिर्वज्रिणि घोरदेडहलनव्यापारशक्तं मनः ॥ हेलोल्लासितकेलिकंदुकनिभः कैलाशशैलादि तस्तत्किं रावण लज्जसे न हरसे चौर्येण पत्नीं रघोः ॥ ८ ॥

हवस्करणं प्रोक्तं तु उ ने ॥ इन्द्रियाकर्षणमिति हलायुधः ॥ ७ ॥ रावणं ज्ञात्वा ॥ अबला शौर्याकुलवान् चौर्यं करोति न तु त्व यि न संभवतीत्याह ॥ ब्रह्मकुले जन्मेति स्पष्टं ॥ हरार्चनविधौ शिरःकर्तनं कृत्वा शक्तिर्वज्रिणि देवेशे शक्तिर्मनो घोरदेउ हलनव्यापारशक्तं ये घोरदृढा दुर्निग्रहास्तेषां निग्रहव्यापारे शक्तं समर्थं ॥ भवता कैलाशगिरिरुत्पाटितः कीदृशः ॥ हेलया अनायासेन उल्लासित उद्भ्रमितो यः केलये क्रीडार्थं कंदुकस्तत्सदृशः ॥ यथैव केलिकंदुकस्तथैव तव गिरिरिति भा वः ॥ तत्तस्माद्देवं बलोसि चौर्येण पत्नीं हरसे तत्किं कस्मान्न लज्जसे ॥ गूढाक्षेपः ॥ ८ ॥ ॥ ॥ ॥ २३

यद्यटवीवर्णनामूर्तिमन्यमानः कविर्गद्यपद्यत्रयमवतारयति एवमित्यादि॥ अत्र श्लोकचतुष्टयस्यैक एव योगः॥ एवं दैवयोगा
दटवीमरन्महावराहस्कंधारूढं करखामनोऽवलोक्याह॥ स्मरामद्रुत्यग्रिमश्लोकेष्वन्वयः॥ कीदृशीमटवीं एवं पूर्वरीत्या दैव
योगात् विधिवशात्॥ भुजगो चित्रसगः॥ भुजगौ सर्पचितलाविनिघरणिः॥ सरभोऽष्टापदः कोलो वराहः कोलः पोतः किरि
किटिरित्यमरः। गवयादिकोलांतानां कोलाहलेनाकृतायभूताः वेतालाश्च वेतालाः भद्रगणा भरः तथा उत्कृष्टाय कालवत्क ए
लाभयकराश्चक्रवालाः समूहाः चक्रवालं तु मंडलमित्यमरः॥ तेषां कंठनालेभ्यः प्रोच्छलत्प्रकटीभवत् तुमुलो व्यक्तो यो घोरशब्दः
तस्मान्मिलिताया वहुलांधकारस्तेन कलितावेष्टिताये गह्वरएणं कुजादीनां अंतरालामध्यप्रदेशास्तेभ्यः गह्वरांतरालेभ्यो

सलक्ष्मणो रामः। एवं दैवयोगाद्गौरखड्गगवयगजभुजगसरभशार्दूलकोलकोलाहलाकृतभूतवेतालसमुतालका
लकरालचक्रवालकंठनालप्रोच्छलत्तुमुलघोरचीत्कारमिलितबहुलांधकारकलितगह्वरांतरालविलसद्विर
लसनरलपरिमलवहुलचलद्दलगलविमलमकरंदविंदुकीलालजालपिच्छिलालवालुलुलितमत्तालिमाल
मंदानिलांदोलवाचालदरदलितललितपृथुलमुकुलधूलिजालमाकंदवृंदखेलत्कोकिलकुलविलासिनीकोम
लालापनिखिलशिखरशिखिलास्यलीलाकलापसानुकूलचंचच्चकोरचक्रमनुगुंजद्धंसपक्षिणीपक्षरद्दिसिद्धिं॥
२६

विलसत् पक्षविरलसरसपरिमलः वहुतरसरलरक्षगंधस्तद्युक्ताये वहुला वहुतराः गलंतः स्वच्छमकरंदविंदवस्त एव की
लालजालं जलपूरपयः कीलालमम्मृतमित्यमरः तेन पिच्छिलाः पूर्णा ये आलवालाः वृक्षमूलगर्त्ताः तत्र लुलिता लुब्धा ये
मत्ता लयो मत्तभ्रमरास्तेषां मालाः पंक्तयः एताश्च परचमंदानिलांदोलनेन वाचाला निश्शब्दिता निहरई षत् दलितानि वि
प्रथुलानि ललितानि यानि वहुमुकुलानि तेषु खेलंत्यो याः कोकिलकुलविलासिन्यः तासां कोमलालापेन निश्चलानि पू
र्णानि रक्षशिखराणि तेषु यो मयूरनर्त्तनलालासमूहा तस्य सानुकूलानतनोत्साहहतवाये इतस्ततोश्चंचेनश्चकोरास्तेषां च
क्रेण युक्तामंजुयथास्यात्तथा गुंजत्यो याः रक्षस्थाः पक्षिण्यस्तासां पक्षस्यात्मवर्गस्य रद्धिसिद्धिर्यस्यां ता अटवीमटन्नित्यग्रि
मेणान्वयः॥ पुनरपि अटवीमेवानुवर्णयति॥ २६॥

पुनः किंविशिष्टामटवीं॥ गगनचुंबने आकाशालिंगने बद्धो लक्ष्यो यैस्ते उन्नतवृक्षास्तेषां विपुलाः फलभागास्त एवावलंबनं तत्रावलंबितायेऽन॥ताः जंतवः तेषां संतोषाववनिर्दोषभूषणो येषां तेषु अध्युषितः स्थितो यन्निःशेषः पूर्णः सविशेषो विविधस्वादुः अमृतवर्षस्पर्द्धी अमृतादपि रमणीयो वर्द्धिष्णुः प्रतिदिनवर्द्धमानो यो रसस्तद्युक्तायेरसालाद्यस्ते द्रुस्तरा राजारन्

गगनचुंबनबद्धलक्ष्योन्नतवृक्षविपुलफलभारावलंबनालंबितानंतजंतुसंतोषपोष
निर्दोषभूषणाध्युषितनिःशेषसविशेषामृतवर्षस्पर्द्धिवर्द्धिष्णुरसरसालप्रियालुहिंताल
महातालतालतमालकृतमालविशालशालशाल्मलिमालूरसल्लकीशिरीषासनशमी
शाकशिंशिपाशोकचंपकसुरद्रुमकोविदारकर्णिकारसिंदुवारबहुसारनिंबजंबूदुंबरकदंबकु
रंजसौभांजनबकुलनिचुलककुभवरुणखर्जूरबीजपूरजंबीरभिंडीरवानीरकाश्मीरनार
गरोमरंगकमरंगकदलीलवलीधात्रीवटकुटजपाटलाकोलकंकोलबोलभल्लातकवि
भीतकहरीतक्याम्रातककेतककतकवैकंकतमधूकजंबूयतीजपाम्बत्यकपित्थचिंचिणीनागके
सरादितरुदुस्तरां नितरामटवीमटन् महावराहस्कंधारूढमुत्कटरटंतकरटं वामतो ऽवलोक्य॥२७

प्रियालुः स्यादित्यमरः॥ हिंतालो हिंमोरकः॥ कृतमालः कचीनालः मालूरो बिल्वः कोविदारः॥ श्यामरिकः॥ सिंदुवारः सिंदूरिका। बहुसारः सप्तपर्णः। सौभांजने शिग्रुतीक्ष्णकंधकाक्षीरमाचका इत्यमरः॥ निचुलो हिंजुलोऽम्बुजः॥ मंजिष्ठरोमरंगे स्त्री॥ कर्मरंगो गुरुः पुमान्निति धरणिः॥ आम्लातकः अम्लवेतः॥ वैकंकतो कंकतिका॥ उत्कटं यथा स्यात्तथा रटंतं करटं काकमतः वामभागे॥ काके तु करटारिष्टेत्यादि॥२७॥ २०

राम: सविस्मयं यथास्यात्तथा दक्षिणतो दक्षिण भागे ।। खंजनमवलोक्य । सानंदं यथास्यात्तथा अभवदिति । कीदृशं
शोकभंजनकाकदर्शनाशुभहरं ।। च पुनः वामेणाक्ष्णा काकं दृष्ट्वा सबाष्पं सकरुणं यथास्यात्तथा आसीदित्यन्वयः ।।
कीदृशं खंजनं ।। एवंभूते सर्पफणामणौ क्रीडंतं । दक्षिणाचलेभ्यः प्रचलिताः प्रसरिताः मलयसंबंधिनी मालत्यादय
स्तेषां पुष्पः परिमलस्तस्य मिलितमकाभावस्तेन चुंबिताः युक्ताः याः कावेर्याद्या नद्यस्तासां सांद्रागंभीराश्च या नीरधारास्ता
सां तरंगैः परिपीता प्रह्ना पिता याः मैत्रावरुणस्यागस्त्यस्य तरुणी कांता लंकाद्यद्रिपर्यंतदेशविशेषाणां कामिन्यश्च तासां
नीरंध्रपीनस्तनादिभारश्चाधिक्येषु अधिष्ठितायः श्रीखंडादिसंभूतयक्षकर्दमस्तेन या गविमर्दः समर्दनं तस्मादिवर्द्धितो

दक्षिणतस्तु दक्षिणाचलप्रचलितमलयमालती मरुवकदमनकलवंगकंकोलजातीतगरशतपत्रादिकमल
मुकुलकुमुदिनीकल्हारपरिमलामिलितचुंबिताकावेरीताम्रपर्णीतुंगभद्रासांद्रगंभीरनीरधारातरंगपरि
पीतमैत्रावरुणतरुणीलंकासशांकारुद्रपादाद्रिसरलसिंहलसालंकाश्रीगोलकापांड्यमंडलकरिगिरी
द्रविडचोलकुंतलकेरलपुन्नागकर्णाटकरहाटविदग्धांगकामिनीनीरंध्रपीनस्तनवदनघनजघनदामू
लधम्मिल्लभारांतराधिष्ठितश्रीखंडागरुकर्पूरमृगमदकुंकुमस्तोमसंभूतयक्षकर्दमविमर्दवर्द्धितविवि
धगंधकुसुमवकुलपरिमलोद्गारिमारुतशनो । त्थितक्षीरनीहारकाश्मीरस्फटिकशुद्धशंखकर्पूरकुंदावदा
तमहाभुजंगस्फीतफूत्कारप्रफुल्लफणामणौ क्रीडंतं शोकभंजनखंजनं चावलोक्य वामेणाक्ष्णा सक
रुणं च सबाष्पं च दक्षिणेन सविस्मयं सानंदं चाभवदिति ।। २८ ।। ।। ।। ।। ।।

यो विविधगंधश्च कुसुमानां बकुलपरिमलश्च तयोः समुद्गारी प्रक्षेपको यो मारुतः स एवाशनो भोजनो यस्य स चासौ उ
त्थितः अर्द्धोदितश्चासौ क्षीरनीहारकाश्मीरस्फटिकशुद्धशंखकर्पूरकुंदावदातः श्वेतोज्वलश्चासौ महाभुजंगश्च तस्य स्फी
ताये फूत्कारास्तैः प्रफुल्लाया फणायां तस्यां मणौ शिरोरत्ने क्रीडंतं ।। २८

कोलस्य वराहस्य। कपोलस्थलसंस्थितः स्कंधमवलंबितः सदैवास्थ्यं समनोनवस्थानं॥ अहो एतदाश्चर्यमेकदैवार्थद्वयसूच
कशकुनत्वात्॥२८॥ ममाभ्युदयोज्ञात एव उपरि स्थित राज्य भंगात्। तर्हि दुःखं भवतु तत्राह॥ अतसीताविंयोगाद्व्यधि
कव्यसनं किमास्ते न किमपीति ममतु मरणमेव शरणं चेत्पुनः राज्यस्यात्तर्हि लक्ष्मणोऽस्तुतत्। व्यसनं लक्ष्मणे मास्तु॥२९
वाम अशुभसूचकं काकं दक्षिणे शुभसूचकखंजरीटं महारण्यमरण्यानीत्यमरः। ततोवनांतरे भ्रमन्। किष्किंधामधिश्रि

काकः कपोलस्थलसंस्थितो मे कोलस्य वामे व्यसनं सदैवास्थ्यं। राज्यं भुजंगस्य फणाधिरूढोव्यनक्त्यहो दक्षिण
खंजरीटः॥२८॥ क्षणं विचिंत्य विश्रम्य च॥ व्यसनं किमतोप्यास्ते ज्ञातश्चाभ्युदयो मम। शरणं मरणं राज्यमापुन
र्लक्ष्मणोऽस्तुतत्॥२९॥ ततो वामं निरस्कृत्य चदक्षिणं॥ धन्या वनशरण्यानामरण्यानीस्मगाहते॥३०॥ कि
ष्किंधाद्रौ रौद्ररुद्रावतारं दृष्ट्वा रामो मारुतिं वाचमूचे॥ सीता नीता केन चिंत्का पि दृष्टा तुष्टः कष्टसंहरन्प्रा
हवीरः॥३१॥ पापेर्णी कृष्यमाणा रजनिचरवरेणांबरेण व्रजंती किष्किंधाद्रौ मुमोच प्रचुरमणिगणैर्भू
षणान्युच्चितानि॥ हा राम प्राणनाथेत्यहह जहि रिपुं लक्ष्मणेत्यालपंती यानीमानीतितानि क्षिपति रघु
पुरः कापि रामांजनेयः॥३२॥ रामः सबाष्पं सकरुणं च॥ जानक्या एव जानामि भूषणानीति नान्यथा॥ वत्स
लक्ष्मण जानीषे पश्य लक्ष्मणनत्वतः॥३३॥ लक्ष्मणः सबाष्पं कुंडले नैव जानामि नैव जानामि कंकणे॥ नू
पुरावेव जानामि नित्यं पादाभिवंदनात्॥३४॥

त्य॥३०॥ किष्किंधागुहातद्युक्तोऽद्रिः किष्किंधाद्रिस्तत्र रौद्ररसाश्रयो रुद्रः रौद्ररुद्रस्तद्वदवतारं। तो मारुते केन चित्पापे
न सीता नीता हृता॥ एतच्छ्रुत्वा रुष्टः जातरोषः हनूमान् रामकष्टं संहरन्सन्प्राह॥३१॥ आंजनेयो हनूमानिति तान्या
भरणानि रघुपुरः विक्षेपकानीत्याह॥ अंबरेणाकाशमार्गेण आकृष्यमाणा कापि रामा या नि किष्किंधाद्रौ मुमोच तानि इ
मानि॥ सुगमं॥३२॥ अन्यथा संदेहो न त्वत्तः संति न वेति॥३३॥ सुगमं॥३४

३१

48

तावन्मात्रांतरासहत्वा आरोपितः॥ कीदृशोहारः मुक्तार्थमौक्तिकार्थयः सूत्रगुणोदोरकस्तद्युक्तास्तेवद्धाः छिद्राणितत्र विभुद्धा विरलग्राशिः समूहोयस्यसः अतएवदुःखपंक्तिभेदफलेनदारुणइति आरोहीदित्यर्थः॥३५॥ पुनरपिजीवने विचिकित्सति॥ अहहेति॥ अहहेतिखेदपवनसूनोहनुमन्॥ मममपरमहंसपरमात्माजीव एवहंसः एतदेहं विहाय व्रजति

रामः॥ अभरापितद्धृदये विन्यस्यगाढमालिंग्य॥ सर्वोपिसत्त्वपितवाभरणेषुहारो नारोपितो दृदिचिरंहृदयंगतोपि॥ मुक्ताथसूत्रगुणवेद्धविशुद्धराशिस्तत्पंक्तिभेदफलदारुणमित्यरोदीत्॥३५॥ अहहजनकपुत्रीवक्त्रेमुद्रामपश्यन्व्रजतिपरमहंसोनक्षमोवाथगंतु॥ तदुरुविरहवन्हिज्वालयादग्धपक्षः किमुतपवनसूनो भूषयोल्लंभितोमे॥३६॥ हनुमान्सानुनयं॥ श्रीरामक्षोणिपालत्यजनिजदृपिताशोकमेकः सलोकलंकेशं जेतुमीशस्तमपिकपिपतेराज्ञयाहंहनुमान्॥ सुग्रीवस्यापिसार्थगिरिमवतरणंपादविन्यासलक्ष्मीनिक्षेपादुत्फलालक्ष्यितरिपुवलदर्शनात्वंविधेहि॥३७॥ ततोहनुमान्सहलक्ष्मणेनरामेणसुग्रीवपुरः स्थितोऽभूत्॥ सुग्रीवः॥ तांस्त्रसाक्षात्कपियूथनाथोपापानिदग्धुंदहनान्ददर्श॥३८॥

तमपिविघ्नजनयिनमपि॥ सलोकलंकावासिराक्षससहितं कपिपतेः सुग्रीवस्य॥ रावणस्तुहनिष्यतएव अथतावत्सुग्रीवस्यअवतरणंअवतीर्यते अस्मिन्नवतरणं वासस्थानं गिरिं पादविन्यासलक्ष्मीनिक्षेपात् सार्थंसार्थकं विधेहीति॥ कीदृशं गिरिं दर्शनात्वहचलोकनादेवतिरस्कृतशत्रुपक्षं॥३७॥ रामेणसहकीदृशेनरामेणसलक्ष्मणेन लक्ष्मणसहितेनेत्यर्थः॥ तान्हनुमद्रामलक्ष्मणान्॥ दहनान्दक्षिणाग्निगार्हपत्याहवनीयान्॥३८॥

वानरेंद्रः सुग्रीवः। अस्य रामस्य पुरतो ऽग्रे वल्लात् बालिनः सकाशात् प्रसिद्धं आत्मीयं कांताहरणं अनु रामकांताहरणश्रवणं लक्षीकृत्य वदति रघुपतिः॥ तं वालिनं। इति किं। कांताहरणदुःखानुभवज्ञत्वात्। अन्यत् सुगमं॥ ३९॥ ससंभ्रमं सादरं। विस्मृतं विरहवियोगान् व्यसनोत्। तत्प्रियायाः आलिंगनं॥ कृतप्रतिज्ञे रामे शीघ्रमेव भविष्यति। अन्यत् सुगमं॥ ४०॥ ये चत्वारो राम भरत लक्ष्मण शत्रुघ्ना राजपुत्राः दशरथनृपसुता जज्ञिरे। तेषां चतुर्णां मध्ये रामः॥ ताडकैव कालरात्रिस्तस्याः प्रत्यूषायं रामः तद्धंतेत्यर्थः नन्वमित्यर्थः ननु स्त्रीवधात् सा गः किं नेत्याह। अमल इति। अमलत्वे हेतुः सुचरितं पुण्याचरणं तथास्य कथा॥ ना

श्रुत्वा रामस्य कांताहरणमनिलात्मजस्याननाद्वानरेंद्रो निश्चिंतस्यात्मीयमस्यानुवदति पुरतस्तद्बलाद्वालिनोपि॥ रामः॥ हा नाथे विद्यमाने किमिति रघुपतिस्तं निहंतुं प्रतिज्ञामारूढः प्रौढरोषानलबहलकलालंकृतोऽधिज्यधन्वा। ३९॥ सुग्रीवः॥ नत्वा ससंभ्रममथो जगदेकवीरमालिंगयन् रघुपतिः शुशुभे कपींद्रः। तद्विस्मृतं पुनरिवाभ्यसने प्रियायाः कंदर्पकेलिषु पुनर्द्रुतभाविनीषु॥ ४०॥ सुग्रीवः अयमकृतनयको सौ चतुर्णां रिपूणां ताडकांतकः। मारुतिः ये चत्वारो दिनकरकुलक्षत्रसंतानवल्लीमालाम्लानस्तवकमधुपा जज्ञिरे राजपुत्राः॥ रामस्तेषामभवदमलस्ताडकाकालरात्रिप्रत्यूषोऽयं सुचरितकथाकंदलीमूलकंदः॥ ४१॥ ॥ ॥

नाविरोधपरिहारवाक्यगुंफः कथा। सैव कंदली कदली तस्याः मूलस्यापि कंदः प्रसरणशीला निर्मूला निदान मध्ये ग्रंथिः कंदः यथा छिन्नापि कदली पुनरुत्पद्यते एवमांछिन्नोपि धर्मोपि पुनरुत्पद्यते नि॥ कंदकं कदलीचीनश्च भुरुप्री पक्वावयीति सर्वेक्षी दृशाः इत्यपेक्षायामाह॥ दिनकरेति दिनकरकुले जातानां क्षत्रियाणां संतान एव वल्ली तस्याः। मालापरंपरा तस्या स्तवका पशः पुष्पगुच्छास्तेषां मधुपाः रविवंशक्षत्रयशोवतसा इत्यर्थः॥ ४१॥

32

50

अमेयान्महतोहननकर्तृत्वान्महतीत्युक्तं। स्तालान्नालवृक्षान्हतेत्यानेवा सौमित्रिः॥ अंघ्रि भारेणचरणागुष्ठाविः कृ
तभूभारेणसरलान्अकृतत्वग्रहेतुः॥ शवस्यपृष्ठस्था निमूलानियेषांतान्॥ एतेनैवमुक्तं भवतिकुंडलीभूतदेहशेषपृष्ठस्थमू
लत्वातेपिकुटिलाइति। कार्यनिदाना द्विगुणान्विघतदुत्यक्तत्वात्॥ चरणभारेणशेषशिरः समाक्रमणात्। सरलत्वं॥ तत्सरल
तयावृक्षाअपिशरलाजाताइतिसूचितं॥ सुगमं॥ ४२॥ अन्यथा एकदेवशरेणकेनेव भिन्नकलेवराः म्रियंतेसप्तानामेवहनना
भावतश्चाप्येकेनैववाणेन॥ ४३॥ भयंसतांदेहंत्यक्ताअसतांदेहं निर्ज्जगामेति। अतःपरदारहरणत्वाद्वालीअसन्नतस्ते

वालिसौमित्रिरामाः॥ श्रुत्वावालीतदनुमहतींराघवस्यप्रतिज्ञांतालान्सप्तप्रकृतिकुटिलान्प्रे
रयामासयोद्धुं॥ सौमित्रिस्तान्कृतसरलान्शेषपृष्ठस्थमूलान्भारेणांघ्रेरथरघुपतिःसंदधेदिव्य
मस्त्रं॥ ४२॥ लक्ष्मणः॥ रामंप्रतिसाशंकं॥ देवज्ञात्वाबाणाः प्रहेतव्याः॥ एकैकेवशरेणैकेनैवभिन्नकलेवराः॥
म्रियंतेसप्तताला अस्त्रघ्नंतिहंतारमन्यथा॥ ४३॥ रामः सावज्ञं॥ माभैषीर्मयिसौमित्रराघवेः धिज्यधन्व
नि॥ सतांदेहंपरित्यज्यनिर्ज्जगामसतांभयं॥ ४४॥ रामः करेणबाणमालभ्य॥ भावोनिशंकुशिक
नंदनपादयोर्मेयद्यस्म्यहंद्विजतिरस्कृतिरोषहीनः। नान्यंगनासु...नः शरसप्ततालान्भित्त्वान
हाप्रविशभूतलमप्यगाधं॥ ४५॥ एकेनैवशरेणबालकदलीकांडप्रभंगक्रमात्कृंत्तेषुप्रथितेषु
दाशरथिनातालेषुसप्तस्वथ॥ अब्धाः सप्तजगंतिसप्तमुनयः सप्ताध्वजः सप्तगाः सत्यसप्तच
मातरोभयभृतः संख्यानस्याःसाम्यादिह॥ ४६

वभयमितिभावः॥ ४३॥ द्विजैः कृतायामेतिरस्कृतिस्ततोपिचेद्रोषहीनः यद्वाद्विजानांतिरस्कृतिस्तेषुरोषश्चेत्तद्र
हितः सुगमं॥ ४४॥ प्रथमेषुमुख्येषुकेनाप्यजितेषु॥ इहतत्केतनावसरे॥ संख्यानसाम्यात्। संख्यासाम्यत्वात्। एते
भयभृतः आसन्नित्यन्वयः॥ तानाह अब्धाः रवेः सप्तगाः सप्तद्वीपाः॥ गकारोगगनद्वीपगणेशेषुगणेपिचेति॥ शब्दशासनः
॥ ४५॥ ४६

रामकराद्विमुक्तोवाणः पुंखावशेषः सन्नूद्धतिपक्षान् विधुनोति॥ कंपयति॥ इतिकिं भुजंगमः॥ शेषस्तद्दंगभयेन
ग्रंवरचरंब्रह्माणंसंबोधयन्निव॥४६॥ विनापराधहननत्वमेव॥ अपापत्वंद्पत्वं पराक्रांतापहरणंवानराणामभे
दकत्वान्॥ यद्वापापोस्त्रीक्रोधपंकयोरितिविश्वः॥ नक्रोधयुक्तहृदयेनेत्यर्थः॥ ४७॥ तारेतिचिंतयामासेतिपूर्वेण
योगः इतिकिं नरोरामः नरस्यैषानाराराभस्यनाराचधारेत्यर्थः॥ अद्यास्यवालिनः प्राणान् हरतु॥ कलिकल्का कले
रंशः पापः तेनराजमानस्य किलकिलेतिपाठेवानरजात्यनुकरणः॥ किलकिलाशब्दः कीदृशीताराधमिल्लः

रामवाणः सक्षोभं॥ वाणः प्रमाणामधिगम्यवसुंधरायाः सबोधयन्निव भुजंगगभीत्या॥ ब्रह्माणमंव
रचरं विधुनोतिपक्षान् पुंखावशेषइतिरामकराद्विमुक्तः॥४६॥ पौरंदरिः सक्रोधं॥ श्रुत्वाहतान् समरमूर्द्ध
निसप्ततालान्रामेणपापहृदयेनविनापराधं। कोपानलज्वलितहृत्कमलोथवाली रंगावतारमगम
द्गिरिचत्वरेषु॥४७॥ तारासहर्षं॥ अस्यभगवतः श्रीपुरुषोत्तमस्यरामचंद्रस्यप्रसादादद्यचिरविरहिणः प्रा
णवल्लभस्यांद्रीवसुग्रीवस्यवक्षः पीठेलुठिष्यामीतिमन्यमाना गिरिशिखरमारुह्यहरिपौरंदरिसम
रमाकांक्षंतीचिंतयामास॥ तारासत्यक्तहारा गिरिशिखरचरास्रस्तधम्मिल्लभारा शोकाब्धिप्राप्तपाराप्र्यि
तमहृन्नशरावीरसुग्रीवद्दाराः॥ नाएनाराचधारानिजरमणरतानापिनः पापिनोऽस्यप्राणान्प्राणाव
तीर्णाहरतुकलिकलाशालिनोवालिनोद्य॥४८॥

केकवंद्योस्त्रीचरकः॥४८॥ ॥

हेवत्सएषवालीकेनायुधेनयोद्धव्यइतियद्वाकेनवीरेणयोद्धव्यः नकेनापिइतिध्वनिः॥ एषकः॥ यः वानरपंक्तीनां वहुलोयः कलकलाशब्दस्तेनाहूतोहेवेंद्रस्तस्यवज्रंआकृष्यआच्छिद्ययोद्धुंवांछति॥ शिवशिवेतिखेदेकीदृगयं॥ तुमु

खरेणाग्रभागेनकवलितंगृहीतंकिंभूतोवालीचंडः अजेयोयः दोर्दंडोभुजदंडः तास्मिनूयः काण्डवाणस्तेनभ्रांतगर्वितः दोर्दंडस्यवाणेनजातगर्वइतिगर्वसंशययोर्भ्रमइतिविश्वः॥ मूलंचाग्रशिखरंचमूलाग्रेताभ्यांयुक्तःशैलः मूलाग्रशैलस्तेन॥ यत्प्रहरणंतत्रनिपुणः॥ ४७॥ हेवाणपुराद्विजगणेनवेदसंदर्वैर्मंत्रैर्गुणैनसममूर्ध्नाअभिषि

रामः सक्षोभंपौरंदरिपुरगारिमगंभीरमहिमानमवलोक्यसौमित्रिमित्रमनुस्मृत्याब्रवीत्॥ वत्स॥ किंवालीवानरालीबहुलकलकलाहूतदेवेंद्रवज्रंवांछत्याकृष्ययोद्धुंशिवशिवतुमुलोत्फालसंचालितार्कः॥ प्रोद्यल्लांगूलवल्लीशिखरकवलितंचंडदोर्दंडकांडभ्रांतोमूलाग्रशैलप्रहरणनिपुणः॥ केनयोद्धव्यएषः॥ ४७॥ रामः सावष्टंभं॥ नारायणवाणमाहूय॥ वेदोक्तैर्द्विजगणेनपुराभिषिक्तो मूर्द्धासमंत्वमपिवाणगुणेनमंत्रैः॥ ततेजसायरवधूजनहारिणस्त्वंप्राणान्गृहाणसमरेष्वतिदारुणेषु॥ ५०॥ रामवाणः पौरंदरिंप्रति॥ व्रात्यंतेजोऽधिगम्यपरदारापहरणपराभवंच॥ अथरघुपतिवाणः प्राप्तवीरेप्रमाणः प्रलयदहनरोचिः कोटिविद्युन्मरीचिः॥ अकृतहृदयभेदंवालिनः सोप्यरोदीदनिहतपितृशत्रुः किंसशल्योहतोस्मि॥ ५१॥ रामः सकरुणसविषादंच॥ वत्ससौमित्रेगिरिगव्हरेषुत्त्वयानिविहितंमहत्सुखमनुभवंतंमहावीरमनपराधिनंवालिनंहत्वामंदभाग्यः कथमहंजानकीसुखमनुभविष्यामीतिशिरोविधुन्वन्पौरंदरिंव्याजहार॥ ५१

सांतेषामंत्राणांतेजसः॥ सुगमं॥ ५०॥ ननिहतः पितुरिंद्रस्यशत्रुः रावणः येनसः अतएवसशल्यः रावणहननमेवशल्यं॥ ५१॥

...र। वीरोः॥ रावणापत्यं मेघनादः शस्त्रौघप्रसरेण शस्त्रतत्रातावारणेन आखंडलमिंद्रं दुर्यशोभागिनं चक्रे रावणिना शक्रो जित इति दुर्यशः॥ हे वीर तत इंद्रगतं दुर्यशस्त्वया सम्यक् सुज्वलीकृतं॥ दूरीकृतमिति भावः॥ कथं दूरीकृतमित्यपेक्षायामाह॥ किंभूतेन त्वया मेघनादपितरं कक्षे व गर्तस्तत्र कुलीरतां कर्कटभावं गमयता प्रापयता। स्यात्कुलीरः कर्कटक इत्यमरः॥ कीदृशमिंद्रं। गौतमशापेन यंत्रितो बद्धो भुजस्थामा भुजबलं यस्य तं॥ प्राणस्थामतरः पराक्रमबलद्युम्नानि सौर्यौजसी तिहैमी॥ ननु नात दुर्यशः सम्यक् मम तु रावणाहननरूपं शल्यमस्त्येवेति

शस्त्रौघप्रसरेण रावणिरसौ पद्दुर्यशोभागिनं चक्रे गौतमशापयंत्रितभुजस्थामानमाखंडलं॥ कक्षागर्तकुलीरतां गमयता वीर त्वया रावणं तत्संमृष्टमहो विशल्यकरिणी जागर्ति सत्पुत्रता॥ ५२॥ वालीप्राणांस्त्यक्तुमिच्छन्॥ सुग्रीवोपि क्षमः कर्तुं यत्कार्यं तव राघव॥ तदहं न क्षमः कस्मादपराधं विनाहतः॥ ५३॥ रामसवाक्यं॥ शुद्धिर्भविष्यति पुरंदरनंदन त्वं मामेव चेदहह पातकिनं शयानं॥ सौख्यार्थिनं निरपराधिनमाहनिष्यस्यस्मात्पुनर्जनक जाविरहो ऽस्तु मा मे॥ ५४॥

चेन्न॥ असौ सत्पुत्रता सत्पुत्रभाववानंगदः जागर्ति जीवत्येव कीदृशी विशल्यं कर्तुं शीलं यस्याः सा॥ अयमंगदो रावणं मत्सहाय्यतया हनिष्यति। एतेन त्वं विशल्यो भवेति भावः॥ रावणपुत्रेण त्वत्पितेंद्रो बद्धः इंद्रपुत्रेण त्वया रावणो बद्ध एतेन सादृश्यं जातं परं त्वत्सुतेन रावणाहननात् नवातिशयमिति॥ ५२॥ सुगमं॥ ५३॥ हे पुरंदरनंदन चेत्त्वमहासं मां हनिष्यसि तदा मम शुद्धिर्मनःप्रसत्तिर्भविष्यति॥ अस्मात्त्वद्धननापराधात् पुनर्जनकजाविरहो मास्तु। शयानं अंतनिष्टत्वान्मीलिताक्षं॥ ५४॥

तदनुप्रस्थानघोषानंतरं मंत्रिभिः कपिभटैर्वर्षाकालंगमयितुं समंतत्र भूत्॥ वर्षांगमयित्वायास्यामइतिनिश्चितवान्॥ ५५॥ एतेन नीतिशास्त्रप्राधान्यंदर्शितमिति॥ ५६॥ प्रकर्षेण म्लानेअस्य णःशोषात्वयस्मिन् तं॥ कलयापिसीतास्वलैशेनापि॥ अत्रसर्वमंगसादृश्यं॥ एतेनगुणकीर्तनावस्थोक्ता॥ सोत्कारसोदधौ॥ वैदेहकांताविषयिकप्रपौरंदरिः॥ तथेत्युक्त्वापुनःस्वर्ग्यागतिस्तेनभविष्यति॥ यावत्त्वांनहनिष्यामिस्थास्यसित्वंयमालये॥ ५५॥ इतिप्राणान्मुमोच॥ दासैरहोरघुपतिःपरिभूयतेकिंवैवस्वतादिभिरुवासतदालयेपि॥ योदेववाक्यमनतिक्रमयन्कियंतंकालंनिहत्यपुरुहूतसुतंसुदेवः॥ ५६॥ रामःकथंचिद्विषादंपरित्यज्यपैरुषमवलंब्य॥ राज्येसुग्रीवमाद्रौसदयितमभिषिच्यांगदंयौवराज्येरामःसेनाधिपत्येसपवनतनयान्वानरेंद्रान्प्रतस्थेलंकासंत्यज्यशंकांतदनुकपिभटैर्माल्यवत्युत्तमाद्रौवर्षाकालंविशालंगमयितुमचिरान्मंत्रिभिःसंमतोऽभूत्॥ ५५
रामात्परःशूरतरोनकश्चित्परोभवः स्त्रीहरणान्नचान्यः॥ तथापिनीतिंप्रविवेशरामोवबंधसेतुंविजयीसुहित्सु॥ ५६॥ रामाद्बलीयान्नपरोपिकश्चिद्दाराऽपहारान्नपरोभिमानः॥ तथापिरामःशरदंसमीक्ष्यवेध्यांबुधौसेतुमरिंनघान॥ ५७॥ तत्रजनकतनयाकमनीयतामनुस्मृत्य॥ इंदुलुप्तइवांजनेनगलितादृष्टिर्मृगीणामिव॥ प्रम्लानारुणसेवविद्रुमदलंश्यामेवहेमप्रभा॥ पारुष्यंकलयाचकोकिलवधूकंठेष्विवप्रस्तुतं॥ सीतायाःपुरतस्तुहंतशिखिनांबर्हाश्चगर्हाइव॥ ५७॥ रामःकादंबिनीताऽवाऽवरमवलोक्य॥ यत्वन्नेत्रसमानकांतिसलिलेमग्नंतदिंदीवरंमेघैरंतरितःप्रियेतवमुखच्छायानुकारीशशी॥ येपित्वद्गमनानुकारिग— तस्तेराजहंसाःगतास्त्वत्सादृश्यविनोदमात्रमपिनोदैवेननक्षाम्यते॥ ५८॥ इतिश्रीहनुमद्विरचितेमहानाटकेसीतावियोगोनामपंचमोंकः॥ ५॥
[illegible]शानस्याप्याख्यानमिति॥ यदिंदीवरंत्वन्नेत्रसमानकांतितदपिसलिलेमग्नंयःतवमुखच्छायानुकारीसोपिशशी [illegible]राजहंसा अपिगताः॥ सुगमं॥ मलायावस्थेयंसोत्कारसोदधौ॥ कांताश्रितकाल्यानिकव्याहारःस्या[illegible] [illegible]सविरचितायांहनुमन्नाटकदीपिकायांसीतावियोगोनामपं[illegible]कः॥ ५॥

...कमुतरहि भः॥ भवतां मध्ये कः आगंतुमर्हतीति॥१॥ हे स्वामिन् प्रभो अयं व्योमतरुराकाशमेव
सः मम क्रमतले उल्लिपाद विन्यासोत्थापनाग्नी चैर स्थितमेव रसरूपके न निरूपयति मूलवत्॥ मूलस्थानीयः॥
॥ इह वत्वत्समीप एव जंबूद्वीपं सागरांतर्वर्त्ति देशं इतः सकाशात् तत्रैव लंकासमीपं नये प्रापयामि॥ लंकापि जंबू
द्वीपांतरालेनयेइत्युक्तार्थ एवपदेन व्याक्रियते॥ जंबूध्वजो जंबूद्वीपः मध्यमपदलोपीसमासः द्वीपशब्देन लक्षणः॥
शेषां जंबूध्वजो॥ नेतो द्वीपापोशेव्ययः स्वराशि तिते ये जंबूद्वीपं लक्षणे शेषां शत्वान॥ स्वर्णाचलो मेरुः त्रिनेत्राचलः
कैलाशः॥ विंध्यादीनां रूपेण सुस्मरखाउत विवलमानप्रत्यगगात अवकरुमानमालल युत्स्यत॥ वप्रामिपवतः स्थला
करोमि॥ इत्युक्ते पि किंकारयामीति विचि किं त्समानपुनरात्मवल मुक्तार्थानुवादेन स्मारयति॥ ३॥ देवाज्ञामित्यारिहान्यां॥ अलंको
वानरभूरानाचष्टे॥ भो भो सुग्रीवसैनिकाः शृणुत॥ व्यसनं महांतप्राप्तस्थिरैः स्थातुं न पुन्यते॥ लंका निः
शंकमालोक्य इहागंतुमिहार्हति॥१॥ हनूमान्सहर्षं दोस्तंभास्फालकेलिमभिनीय प्रचंडदोर्दंडयोर्म
हती प्रौढिं नाटयति॥ देवपश्य॥ कूर्मो मूलेवदाल वालवप्पानायो लतावद्दिशोमेघाः पल्लवत्प्रसूनफ
लवन्नक्षत्रसूर्यद्वयः॥ स्वामिन् व्योमतरुर्मम क्रमतले शुत्वेतिगांमारुतेः सीतान्वेषणमादिशन् दिश
तु वो रामः सहर्षः श्रियं॥२॥ देवाज्ञापय किंकरोमि सहसा लंकामिहैवानये जंबूद्वीपमितो नये किमथवा
वारांनिधिं शोषये हेलोत्पाटितविंध्यमंदरगिरिस्वर्णाग्निनेत्राचलक्षेपक्षुभ्यद्विवर्तमान सलिलं बध्नामि
वारांनिधिं॥३॥ अपि च॥ देवाज्ञां देहि राज्ञा त्वमसि कुलगुरुः शोषये किं पयोधिं किं वा लंकामलंकाम
हमुपनये जानकीमानकीर्णां सेतुं बध्नामि मन्तः स्फुटितगिरितरीभूतभंगातरंगाउद्भ्राम्यन्नक्रचक्र
क्रममकरकरियाहचित्कारघोरं॥४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
अत्र लंकैव नास्तीत्येवं चूर्णीकरोमीति शेषः॥ अथवा मानकीर्णां पातिव्रत्यान्वितमतीं जानकीमुपनये त्वत्समीपमा
नयसि तु बध्नामि॥ किं भूतं सेतुं मत्तः सकाशात् स्फुटिता ये गिरयस्तेषां तरीभिर्भूतानां भंगो यत्र तस्मात् तरंगाद् उद्भ्राम्यंतो
ये नक्रास्तेषां चक्राणां समूहानां क्रमादुत्फाल्य मकरा यह ग्राह चीत्कारैर्घोरी नक्राः सपक्षजातीया मकराः सुश्रुतु
ग्रहाः एतद्भिन्ना ग्राहास्तद्भिन्ना ग्राहाः समुदीरिताः॥ इति वैद्यके॥ यद्वा किं विशिष्टात् मत्तः स्फुटिता ये गिरयस्तेषां तरीभिये

३५

56

[OrderDescription]
,CREATED=19.10.20 11:26
,TRANSFERRED=2020/10/19 at 11:34:37
,PAGES=56
,TYPE=STD
,NAME=S0004153
,Book Name=M-1804-HANUMAN NATAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,